

मौनिश्रीकृष्णभट्टविरचितं

शब्दार्थतर्कामृतम्

सम्पादकः

ललितकुमारत्रिपाठी

राष्ट्रियसंस्कृतसंस्थानम्

गङ्गानाथझापरिसरः

मौनिश्रीकृष्णभट्टविरचितं

शब्दार्थतर्कामृतम्

सम्पादकः

ललितकुमारत्रिपाठी

राष्ट्रियसंस्कृतसंस्थानम्

गङ्गानाथझापरिसरः

Ganganatha Jha Campus Text Series No. 49

Śabdārthatarkāmṛtam

of

Maunī Śri Kṛṣṇabhaṭṭa

Edited by
Lalit Kumar Tripathi

Rashtriya Sanskrit Sansthan
Ganganatha Jha Campus
Chandrashekhar Azad Park
Allahabad - 211 002

2010

Published by : **Principal**
Rashtriya Sanskrit Sansthan
Ganganatha Jha Campus
Chandrashekhar Azad Park
Aòahabad - 211 002 (U.P.) India

ISBN : 978-93-83135-99-8

Second Edition : 2010

Price : ₹ 100.00

Printed At : **Academy Press**
602, Daraganj, Allahabad

गङ्गानाथझापरिसरमूलग्रन्थमाला

प्रसूनम् - 49

मौनिश्रीकृष्णभट्टविरचितं

शब्दार्थतर्कामृतम्

सम्पादकः

ललितकुमारत्रिपाठी

राष्ट्रियसंस्कृतसंस्थानम्
गङ्गानाथझापरिसरः
आजादोद्यानम् , इलाहाबादः 211002

2010

प्रकाशकः प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम्
(मानित-विश्वविद्यालयः)
गङ्गानाथझा-परिसरः,
इलाहाबादः -2

संस्करणम् द्वितीयम्

प्रकाशनवर्षम् - 2010

मूल्यम् : 100.00 रूप्यकाणि

पृष्ठविन्यासकारः
ब्रह्मानन्दमिश्रः

सहयोगः
आशीषकुमार द्विवेदी

मुद्रणम् एकेडमी प्रेस
602, दारागंज, इलाहाबाद

प्रथमसंस्करणस्य

भूमिका*

।। श्री सच्चामहापुरुषाय नमः ।।

।। मातृपितृचरणकमलेभ्यो नमः ।।

।। श्री गुरुभ्यो नमः ।।

वन्दे महापुरुष ते चरणारविन्दम् !

1. व्याकरणदर्शनपरम्परायां मौनिश्रीकृष्णभट्टः

1.1 भारते व्याकरणस्याध्ययनाध्यापनपरम्पराऽतीव प्राचीना वर्तते।[1] बृहस्पतेः इन्द्राच्चेयं व्याकरणपरम्पराऽजस्रं प्रवहन्ती चकास्तीति स्पष्टमभिधत्ते महर्षिः पतञ्जलिः।[2] महर्षिः पाणिनिः बहूनां पूर्ववर्तिनां संस्कृतवैयाकरणानां नामानि स्वकीयायामष्टाध्याय्यामुल्लिलेख।[3] भारते व्याकरणशास्त्रस्य विचारविषयेषु दार्शनिका अपि नैके विषया आसन् । प्राचीनभारते दार्शनिकसम्प्रदायेषु वैयाकरणानां विशिष्टं स्थानमवर्तत।[4] व्याकरणदर्शनमाश्रित्य व्याडिकृतो लक्षश्लोकात्मकः संग्रहग्रन्थः पुराऽध्ययनाध्यापनविचारणासु सुप्रथित आसीद्।[5] महर्षिणा पतञ्जलिना स्वकीये महाभाष्ये

---

1. द्र. संव्या.इति., पृ. 54-72
2. *बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता* (म.भा.पस्प. पृ. 42)
3. द्र. संव्या.इति., पृ. 134-177
4. भर्तृ., पृ. 72
5. *प्रायेणसंक्षेपरुचीनल्पविद्यापरिग्रहान्। सम्प्राप्य वैयाकरणान् संग्रहेऽस्तमुपागते।।* (वा.प. 2/476) अत्र संक्षेपरुचीन् वैयाकरणान् सम्प्राप्य संग्रहेऽस्तमुपागते इति वचनेन स्पष्टं वक्तुं शक्यते यत् ततः पूर्वं संग्रहग्रन्थोऽध्ययनाध्यापनादिषु प्रथित आसीदिति।

---

* प्रथमसंस्करणे ग्रन्थादौ 'व्याकरणदर्शनपरम्परायां शब्दार्थतर्कामृतं तत्प्रतिपाद्याश्च' इति भूमिकात्मकशोधलेखरूपेण प्रकाशिता।

व्याडिकृतस्य संग्रहग्रन्थस्य बहवो विचाराः संगृहीताः।[6] यद्यपि साम्प्रतं नोपलभ्यते संग्रहग्रन्थस्तथापि महाभाष्ये व्याकरणदर्शनस्य प्रायेण बहवो विषया यथाप्रसङ्गं विचारिताः प्राप्यन्ते।[7] महाभाष्यस्यार्थानभिज्ञैर्यदा महाभाष्यं विकृतं तदा चन्द्राचार्यप्रभृतिभिः पर्वतक्षेत्राद् व्याकरणदर्शनपरम्परा प्राप्ता संरक्षिता च।[8] ततः परं भर्तृहरेर्गुरुणा वसुरातेन व्याकरणदर्शनस्य सिद्धान्ताः संग्रथिताः समुपबृंहिताश्च।[9] तस्मादेव गुरोरधीतविद्यो भर्तृहरिर्व्याकरणदर्शनस्य महान्तं ग्रन्थं वाक्यपदीयं विरचयामास यत्र तेन व्याकरणदर्शनस्य प्रायेण समेऽपि विषया नैकदार्शनिकसिद्धान्तैः सह स्वप्रतिभया विमृष्टाः।[10] भर्तृहरेनन्तरं महाभाष्ये प्रदीपाख्यव्याख्यालेखककेन श्रीमता कैयटेन[11] वाक्यपदीयव्याख्यातृभिश्च[12] इयं परम्पराऽग्रे नीता।

---

6. *कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना। सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने।।* (2/477) इति वचनेन भर्तृहरिः स्वयं प्रतिपादयति यत् संग्रहेऽस्तमुपागते महाभाष्यकारेण महाभाष्ये सर्वेषां न्यायबीजानां निबन्धनं कृतम्

7. वाक्यपदीये प्रतिपादितानां प्रायेण सर्वेषां व्याकरणदर्शनसिद्धान्तानां मूलं महाभाष्ये प्राप्यत इति वाक्पदीयस्य टीकाकारास्तत्तत्कारिकाव्याख्यानप्रसङ्गे स्पष्टं निरूपयन्ति।

8. *बैजिसौभवहर्यक्षैः शुष्कतर्कानुसारिभिः। आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके।* (वा.प. 2/479)

   यःपतञ्जलिशिष्टेभ्यो भ्रष्टो व्याकरणागमः। काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः।।(वा.प. 2/480)

   पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः। स नीतो बहुमार्गत्वं चन्द्राचार्यादिभिः पुनः।। वा.प. 2/481

9. *न्यायप्रस्थानमार्गांस्तानभ्यस्य स्वं च दर्शनम्। प्रणीतो गुरुणाऽस्माकमयमागमसंग्रहः।।*वा.प. 2/482

10. वाक्यपदीये प्रायेण प्रत्येकं विषयो नैकदार्शनिकसिद्धान्तैः सहोपस्थाप्यते। क्वचित्तु वाक्यपदीयकारस्य किं मतमित्यपि तत्रत्यवर्णनेन निश्चेतुं कठिनं भवति।

11. महाभाष्यस्य प्रदीप इत्याख्यव्याख्यालेखकः कैयटोऽपि यथाप्रसङ्गं व्याकरणदर्शनस्य विषयेषु विमृशति।

12. वाक्यपदीयकारिकाणां मतविवरणेन व्याकरणदर्शने वाक्यपदीयटीकाकाराणां महदवदानं ज्ञातुं शक्यते। वाक्यपदीयस्य टीकानां विषये द्र. भर्तृ., पृ. 17-46

1.2 श्रीमता भट्टोजिदीक्षितेन शब्दकौस्तुभे प्रायेण पूर्ववैयाकरणदार्शनिकैः संक्षेपेण विस्तरेण वा प्रतिपादिता व्याकरणदर्शनस्य बहवो विषया दर्शनान्तरीयसिद्धान्तखण्डनधिया नूतनया सरण्या विमृष्टाः। एतान् व्याकरणदर्शनविषयान् संक्षेपेण प्रतिपादयितुं तेन वैयाकरणमतोन्मज्जनम् इति कारिकामयो ग्रन्थोऽपि व्यरचि[13] यत्र केचन श्लोकाः संकलिताः केचन स्वयं कृताश्च तेन।[14] भट्टोजिदीक्षितशिष्येण श्रीमता वनमालिमिश्रेण वैयाकरणमतोन्मज्जनकारिकासु भट्टोजिदीक्षितस्य निगूढं तात्पर्यं प्रकाशयितुं वैयाकरणमतोन्मज्जनटीका निरमायि।[15] ततः परं गौतमजैमिनिवचनव्याख्यातृभिर्दूषितान् व्याकरणसिद्धान्तान् विविधाभिर्युक्तिभिः पुनरपि सप्रपञ्चं व्याचिख्यासुना[16] श्रीमता कौण्डभट्टेन क्वचिन्नवसिद्धान्तप्रतिपिपादयिषया[17] दर्शनान्तरीयसिद्धान्तखण्डने नवनवयुक्तिप्रयुक्तिधिया पूर्ववैयाकरणदार्शिनिकैः सह स्ववैमत्यप्रकाशनबुद्ध्या[18] च वैयाकरणभूषणम् इति ग्रन्थो व्यरचि। ग्रन्थस्यास्यातिविस्तरत्वात् तत्संक्षेपरूपो वैयाकरणभूषणसारोऽपि तेन व्यरच्यत।

1.3 कौण्डभट्टात् परं श्रीमान् नागेशभट्टः पूर्ववर्तिवैयाकरणदार्शनिकैर्विचारितान् व्याकरणदर्शनसिद्धान्तान् स्वीयया नवनवोन्मेषशालिन्या बुद्ध्या दर्शनान्तरीय-सिद्धान्तखण्डने तीक्ष्णयुक्तिप्रयोगनैपुण्या व्याकरणदर्शनपरम्परायां कञ्चिद् नवोन्मेषमानेतुं प्रायतत। श्रीमता नागेशभट्टेन व्याकरणदर्शनविषया महाभाष्यप्रदीपव्याख्यानभूत उद्योते,

---

13. फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः। तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते।। (वै.मतो.1)

14. द्र. बृ.वै.भू., परिशिष्टम् , पृ. 343-345

15. द्र. वै.म.टी., भूमिका, पृ. 1,2

16. ०गौतमजैमिनिवचनव्याख्यातृभिर्दूषितान्। सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये।

 ० कौण्डभट्टः कुर्वेऽहं वैयाकरणभूषणम् (बृ.वै.भू., मङ्गलाचरणम्)

17. द्र. बृ.वै.भू.भूमिकायां (पं.मनुदेवभट्टाचार्यलिखितायां) कौण्डभट्टस्य नव्यमतप्रतिष्ठापकत्वम् इति शीर्षकम्, पृ. 15

18. द्र. वै.म.टी., भूमिका, पृ.7-18; बृ.वै.भू., भूमिका, पृ. 46

वैयाकरणसिद्धान्तमञ्जूषायां वैयाकरणसिद्धान्तलघुमञ्जूषायां च विस्तरेणोपबृंहिताः। नागेशादनन्तरमपि व्याकरणदर्शनपरम्पराप्रवाहो नैवावरुद्धः।

1.4 पाणिनीयव्याकरणसम्प्रदाये नागेशादुत्तरवर्तिषु वैयाकरणदार्शनिकेषु मौनिश्रीकृष्णभट्टो महान् दार्शनिको बभूव। मौनिकृष्णभट्टो व्याकरणदर्शनस्य नैकाः कृतीर्व्यरीरचत्।[19] एतासु कृतिषु प्रमुखाः सन्ति – 1. स्फोटचन्द्रिका 2. वृत्तिदीपिका 3. लघुविभक्त्यर्थनिर्णयः 4. शब्दार्थतर्कामृतम् 5. आख्यातवादश्चेति। एतासु स्फोटचन्द्रिका, वृत्तिदीपिका, लघुविभक्त्यर्थनिर्णयः प्रकाशिता आसन् , किं च शब्दार्थतर्कामृतम् इति ग्रन्थ इदानीं यावदप्रकाशित एवासीत् । लघुविभक्त्यर्थनिर्णस्य सम्पादको वाक्रे इत्युपाह्वो गङ्गाधरभट्टसुतमहादेवशर्मा अपि च वृत्तिदीपिकायाः सम्पादको भारद्वाजो गङ्गाधरशास्त्री शब्दार्थतर्कामृतग्रन्थस्य अनुपलब्धतामेवोचतुः।[20] सौभाग्यादस्य ग्रन्थस्य एकः सम्पूर्णो हस्तलेखो राष्ट्रियसंस्कृतसंस्थानस्य गङ्गानाथझापरिसरे सुरक्षितो लभ्यते।[21] अस्य ग्रन्थस्यान्येऽपि त्रयोऽपूर्णा हस्तलेखाः संम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सरस्वतीभावनसंग्रहालये रक्षिताः सन्ति।[22] एतेषां हस्तलेखानां छायाप्रतिकृतीराश्रित्य सम्पादितोऽयं ग्रन्थः साम्प्रतं Journal Of the Ganganath Jha Kendriya Sanskrita Vidyapeetha इत्याख्यशोधपत्रिकायाः 63 भागस्य परिशिष्टे प्रकाश्यतामेति। ग्रन्थेऽस्मिन् व्याकरणदर्शनस्य प्रमाणप्रमेयमीमांसा कृता वर्तते। अत्र प्रमाणप्रमेयविषये तार्किकसिद्धान्तानामुपस्थापना-लोचनापुरस्परं वैयाकरणानां सिद्धान्ता निरूपिताः सन्ति।

2. ग्रन्थकर्तुः मौनिश्रीकृष्णभट्टस्य परिचयः

2.1 पूर्वोक्तानां व्याकरणदर्शनकृतीनां कर्ता श्रीमान् मौनिश्रीकृष्णभट्टः शब्दार्थतर्कामृतम् इति ग्रन्थस्यान्ते पुष्पिकायां स्वकीयं परिचयमेवं प्रास्तौत् "इति श्रीमन्मौनिकुलतिकायमानगोवर्द्धनभट्टात्मज-जानकीजानि-रघुनाथभट्टात्मज-

---

19. N.C.C Vol. 4, p.338-339

20. द्र. वा.सं., विज्ञापनम्, पृ. 1; वृ.दी.प्रस्तावना पृ. 6

21. Acc. No.36805

22. Acc. No. 30681,32950,30455

श्रीकृष्णभट्टविरचित-वैयाकरणपरिभाषारूप-शब्दार्थतर्कामृताख्यो ग्रन्थस्समाप्तः"[23]। ग्रन्थकर्तुरुल्लेखेनानेन ज्ञायते यत् श्रीमौनिश्रीकृष्णभट्टो गोवर्द्धनभट्टस्य प्रपौत्रो रघुनाथभट्टस्य पुत्रः श्रीकृष्णभट्टो वर्तते। अस्य मातुर्नाम जानकी इत्यपि स्फुटमत्रास्ति। श्रीमान् मौनिश्रीकृष्णभट्टो लघुविभक्त्यर्थनिर्णय इत्याख्ये स्वरचिते ग्रन्थे शब्देन्दुशेखर-मञ्जूषयोर्नाम गृह्णाति।[24] अनेन स्फुटं वर्तते यदयं मौनिश्रीकृष्णभट्टः श्रीमतो नागेशभट्टादर्वाचीनो वर्तते।

2.2 मौनिश्रीकृष्णभट्टः स्वपितामहस्य नाम गोवर्द्धनभट्ट इति उल्लिखति। प्रकाशाख्यतर्कभाषाटीकाया न्यायबोधिन्याश्च प्रणेताऽपि गोवर्द्धनभट्टोऽस्ति प्रसिद्धः। यद्यपि स्फोटचन्द्रिकायाः सम्पादको वाक्रे इत्युपाह्वो गङ्गाधरभट्टसुतमहादेवशर्मा श्रीकृष्णभट्टस्य पितामहं गोवर्द्धनभट्टं तर्कभाषायाः न्यायबोधिन्याश्च कर्तारम् अभिन्नं मनुते,[25] किं च मौनिश्रीकृष्णभट्टस्य पितामहो गोवर्द्धनभट्टस्तु तस्माद् भिन्न एवेति विचारितं विद्वद्भिः।[26] वृत्तिदीपिकायाः सम्पादको भारद्वाजो गङ्गाधरशास्त्री अपि एतयोर्भेदमेव प्रतिपादयति।[27] न्यू कैटलागस् कैटलागोरम् इत्यस्मिन् ग्रन्थे मौनिश्रीकृष्णभट्टस्य पितामहो गोवर्द्धनभट्टो न्याबोधिन्यास्तर्कभाषाटीकायाश्च लेखको गोवर्द्धनमिश्रो भिन्नरूपेण दर्शितौ वर्तेते।

3. मौनिश्रीकृष्णभट्टस्य व्याकरणदर्शनकृतीनां परिचयः

3.1 **स्फोटचन्द्रिका** तावद् वैयाकरणानां स्फोटसिद्धान्तस्य विवरणार्थं मौनिश्रीकृष्णभट्टेन लिखिता। कृतिरियं वाराणसीतः 1899 ईस्वीये वर्षे शब्दकौस्तुभस्य परिशिष्टे प्रकाशिता। पुनश्च मुम्बईतो गुजरातीमुद्रणालयेन 1913 ख्रीस्ताब्दे प्रकाश्यतां नीता। अस्याः कृतेः1913 संस्करणस्य सम्पादको बाक्रे इत्युपाह्वगङ्गाधरभट्टसुत-महादेवशर्मा वर्तते। स्फोटचन्द्रिकायां शब्दविषये नैयायिकानां मीमांसकानां मतानि

---

23. श.त., पुष्पिका
24. द्र. लघु.वि.नि., वा.सं.भा 3, पृ.46,48,52,56,57,67
25. द्र. वा.सं.,भा.1, विज्ञापनम् पृ. 1
26. द्र. वृ.दी., प्रस्तावना, पृ. 6
27. द्र. वृ.दी., प्रस्तावना, पृ. 6

पर्यालोचितानि अथ च वैयाकरणानां राद्धान्तो विविधाभिर्युक्तिभिः स्थापितो वर्तते। अत्र वर्णपदवाक्याखण्डपदाखण्डवाक्यस्फोटभेदेन पञ्च व्यक्तिस्फोटा निरूपिताः। वर्णपदवाक्यभेदेन त्रिविधो जातिस्फोटो निरूपितः। एवं चात्राष्टौ स्फोटा वर्णिताः सन्ति। अत्र ग्रन्थकारो नैयायिकानां मतं खण्डयन् वैयाकरणसिद्धान्तं स्थापयति। क्वचिच्च पूर्ववर्तिनां वैयाकरणानामपि मतं खण्डयति। क्वचिच्च स्वीयां नूतनामुद्भावनामपि प्रकटयति।

3.2 **वृत्तिदीपिका** प्रिन्सेस आफ वेल्स सरस्वतीभवनग्रन्थमालायाः एकोनत्रिंशत्तमग्रन्थरूपेण 1930 खीस्ताब्दे प्रकाशिता वर्तते। अस्य संस्करणस्य सम्पादको भारद्वाज इत्युपाख्यो गङ्गाधरशास्त्री महाशयो वर्तते। अयं ग्रन्थः पुनरपि राजस्थानपुरातनग्रन्थमाला 7 रूपेण जोधपुरतः1956 ईस्वीये वर्षे प्रकाशितः। वृत्तिदीपिकायां शक्ति–लक्षणा–व्यञ्जना–धात्वर्थ–तिङर्थ–सनाद्यर्थ–समासार्थ–स्त्रीप्रत्ययार्थ–तद्धितार्थ–विषया विस्तरेण विमृष्टाः सन्ति। ग्रन्थेऽस्मिन् उक्तविषयेषु विविधा दार्शनिकसिद्धान्ता आलोचिताः, पूर्ववर्तिनां वैयाकरणानां मतान्यपि क्वचिदालोचितानि सन्ति। अत्र ग्रन्थकारस्य दृष्ट्या व्याकरणसिद्धान्ताः स्थिरीकृता दृश्यन्ते।

3.3 **लघुविभक्त्यर्थनिर्णयो** मुम्बय्यां गुजरातीमुद्रणालयेन 1915 खीस्ताब्दे प्रकाशितो विद्यते। अस्य सम्पादको बाक्रे इत्युपाह्वगङ्गाधरभट्टसुतमहादेवशर्ममहाशयो वर्तते। अस्मिन् ग्रन्थे विभक्त्यर्थविषये न्यायसिद्धान्तानां खण्डनपूर्वकं वैयाकरणसिद्धान्ता नागेशात् परं पुनरपि स्थापिताः सन्ति। श्रीमतः कौण्डभट्टात् परं श्रीमता नागेशभट्टेन न्यायसिद्धान्तखण्डनपूर्वकं वैयाकरणसिद्धान्ताः स्थापिता आसन्। नागेशभट्टेन स्वस्मात् प्राग्वर्तिनां वैयाकरणमूर्द्धन्यानां मतान्यपि नैकेषु स्थलेषु खण्डितान्यासन्। श्रीमौनिश्रीकृष्णभट्टो विभक्त्यर्थविषये वैयाकरणमतं स्थापयितुं पूर्ववर्तिनां वैयाकरणानां युक्तीरुपयुज्य नूतनाश्च युक्तीः प्रयुज्य न्यायमतं खण्डयति। अपि च नैकेषु स्थलेषु श्रीमन्नागेशभट्टमतमपि खण्डयति।

3.4 **आख्यातवाद** इत्यपि ग्रन्थो मौनिश्रीकृष्णभट्टेन लिखितः। मौनिश्रीकृष्णभट्टः स्वयमेव लघुविभक्त्यर्थनिर्णये स्वकृतस्याख्यातवादस्य

नामोल्लिलेख।[28]

3.5 **शब्दार्थतर्कामृतम्** साम्प्रतं प्रकाश्यमानोऽयं ग्रन्थो व्याकरणदर्शने प्रमाणप्रमेयमीमांसादृष्ट्या महत्त्वपूर्णं स्थानं बिभर्ति। ग्रन्थकृताऽत्र चतुर्षु प्रमुखेषु विषयेषु विचारणा कृता। 1.प्रत्यक्षनिरूपणम् 2.अनुमाननिरूपणम् 3.उपमाननिरूपणम् 4.शब्दनिरूपणं चेति । प्रत्यक्षनिरूपणप्रसङ्ग एव पदार्थचर्चाऽपि कृता दृश्यते । अत्र प्रतिपादितानां विषयाणां संक्षेपोऽग्रे विधीयते।

4. शब्दार्थतर्कामृतस्य प्रतिपाद्यविषयाः

मौनिश्रीकृष्णभट्टेन शाब्दिकानां मते प्रमाणप्रमेयविषयनिरूपणार्थं शब्दार्थतर्कामृतम् इति ग्रन्थो विरचितः। ग्रन्थस्य प्रतिपाद्यविषया अत्र यथाक्रमं प्रस्तूयन्ते-

4.1 शब्दार्थतर्कामृते महान् वैयाकरणदार्शनिको मौनिश्रीकृष्णभट्टो न्यायदर्शनस्य विविधान् सिद्धान्तान् प्रस्तौति, व्याकरणदर्शनदृष्ट्या तान् परीक्ष्य खण्डयति, स्वदृष्ट्या व्याकरणदर्शनाभिमतं निरूपयति च।

4.2 ग्रन्थकारो ग्रन्थस्यारम्भं मङ्गलेन विधाय मङ्गलविषयकं विचारमारभमाणो मङ्लक्षणमित्थं प्रस्तौति– "तच्च विघ्नभिन्नत्वे सति विघ्नध्वंसप्रतिबन्धकाभावभिन्नत्वे सति प्रारिप्सितविघ्नध्वंसासाधारणं कारणम्"।[29] लक्षणस्यास्य विशेष्यविशेषणयोर्दानस्य फलमुक्त्वा लक्षणस्यास्य विनायकस्तवपाठादावतिव्याप्तिमाशङ्क्य विनायकस्तवपाठस्यापि मङ्गलत्वस्वीकारे न किञ्चिद् बाधकमिति प्रतिपादयति।[30] विनायकस्तवपाठस्य मङ्गलत्वस्वीकारेण मङ्लविचारप्रसङ्गे तार्किकोक्तायाः अनेककार्यकारणभावकल्पनाया विशिष्टस्य कार्यतावच्छेदकत्वकल्पनायाश्च गौरवग्रस्तत्वमुक्त्वा तार्किकमतं निराकरोति।[31]

---

28. *विस्तरस्तु अस्मत्कृताख्यातवादे द्रष्टव्यः* (लघु.वि.नि.,वा.सं.भा.3, पृ.45)

29. श.त., ग्रन्थांशः 1.1

30. श.त., ग्रन्थांशः 1.2

31. श.त., ग्रन्थांशः 1.3

4.3 मङ्गलविचारात् परं प्रमाणविचारमारभमाणो विविधदर्शनदृष्ट्या प्रमाणसङ्ख्यां निरूपयन् शाब्दिकानां मते प्रत्यक्षं शब्दश्चेति प्रमाणद्वयमस्तीति मतं प्रतिपादयति।[32] ततः पश्चात् प्रत्यक्षानुमानयोरेकवाक्यताविषये तार्किकसिद्धान्तं समीक्ष्य[33] प्रत्यक्षप्रमाणं निरूपयन् निर्विकल्पकसविकल्पकभेदेन प्रत्यक्षद्वैविध्यमपि खण्डयति।[34]

4.4 प्रत्यक्षप्रमाणनिरूपणात् परं पदार्थनिरूपणमारभमाणो द्रव्यत्वजातेः खण्डनं विधाय[35] शाब्दिकाभिमतं "वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते। द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विविक्षतः।" यद्वा "लिङ्गसङ्ख्यान्वितं द्रव्यम्" इति द्रव्यलक्षणं प्रतिपादयति।[36] लक्षणद्वयस्यास्य धात्वर्थाव्ययार्थव्यतिरिक्तसप्तपदार्थसाधारणत्वं निरूपयन्[37] द्रव्याद्रव्यभेदेन पदार्थस्य द्वैविध्यं च प्रतिपादयन् तार्किकोक्तानां पदार्थविभाजकोपाधीनां वैयर्थ्यम्[38] आचष्टे। ततः परं दिक्कालयोरीश्वरादनतिरिक्त-वादिमतम् खण्डयित्वा[39] आकाशस्य नित्यत्वं च खण्डयति[40]। ततः पश्चात् सगुणकपालान्निर्गुणोत्पत्तिरिति तार्किकसिद्धान्तं खण्डयन्[41] गुणस्य द्रव्यातिरिक्तत्वं निराकरोति[42]। आत्मनिरूपणे तार्किकमतं निरूप्य[43] विविधदार्शनिक-

---

32. श.त., ग्रन्थांशः 2
33. श.त., ग्रन्थांशः 3, 4.1-4.5
34. श.त., ग्रन्थांशः 4.6-4.9
35. श.त., ग्रन्थांशः 5.1-5.2
36. तदेव
37. तदेव
38. श.त., ग्रन्थांशः 5.3
39. श.त., ग्रन्थांशः 5.4
40. तदेव
41. श.त., ग्रन्थांशः 5.6
42. श.त., ग्रन्थांशः 5.7
43. श.त., ग्रन्थांशः 6.1

सिद्धान्तानुपस्थापयति[44]। मनोनिरूपणे मनसोऽतिरिक्तद्रव्यत्वप्रतिपादनपरं तार्किकमतं निरूपयन् मनो नातिरिक्तं द्रव्यं, किन्तु पृथिव्यादीनां सात्त्विकांशैरुत्पन्नमिन्द्रियमिति वर्णयति।[45] तस्मात् परं तार्किकोक्तं सुवर्णस्य तैजसत्वं खण्डयित्वा सुवर्णस्य पार्थिवत्वं हिरकस्य तैजसत्वं शाब्दिकाभिमतत्वेन निरूपयति।[46] ततो दिक्कालयोः पृथक् द्रव्यत्ववादिमतम् ईश्वररूपतावादिमतं चोपस्थाप्य पुनरपि खण्डयति।[47]

4.5 गुणनिरूपणे तार्किकाभिमताया गुणत्वजातेः खण्डनं विधाय "सङ्केतविशेषसम्बन्धेन गुणशब्दवत्त्वमेव गुणत्वम्" यद्वा "द्रव्यभिन्नद्रव्यसमवेतत्वे सति कृतिसाध्यत्वासाध्यत्वोभयत्वमेव गुणत्वम्" इति गुणलक्षणं शाब्दिकसिद्धान्तरूपेण प्रतिपादयति।[48] ततः परं तार्किकमतेऽतिरिक्तरूपेण स्वीकृतं चित्ररूपं शाब्दिकमते निराकरोति।[49]

4.6 कर्मनिरूपणे कर्मत्वस्य द्रव्यविभाजकोपाधिरूपेण खण्डनं विधाय[50] तस्य जातित्वमपि खण्डयित्वा कर्मत्वं नाम क्रियात्वं तच्च फलनिष्ठजन्यता-निरूपितजनकताश्रयत्वं यद्वा कालनिष्ठपरिच्छेदकतानिरूपितपरिच्छेदकत्वम्, सङ्केतविशेषसम्बन्धेन क्रियापदवत्त्वं वेति रूपेण कर्मत्वं प्रतिपाद्य[51] कर्मणः पञ्चत्वकथनमपि निराकरोति।[52]

---

44. श.त., ग्रन्थांशः 6.2-6.7
45. श.त., ग्रन्थांशः 7.1
46. श.त., ग्रन्थांशः 7.3-7.5
47. श.त., ग्रन्थांशः 7.6
48. श.त., ग्रन्थांशः 8.1-8.2
49. तदेव 8.4
50. श.त., ग्रन्थांशः 9.1-9.2
51. तदेव
52. श.त., ग्रन्थांशः 9.3

4.7 सामान्यनिरूपणे तार्किकसिद्धान्तमुक्त्वा[53] सामान्यं न पदार्थान्तरमिति प्रतिपादयन् शाब्दबोधे शब्दस्यैवावच्छेदकत्वं विशदं निरूपयति।[54] तत्रैव सैन्धवशब्दस्य नानार्थत्वं निराकुर्वन् "वस्तुतस्तु नानार्था नैव सन्ति। सकृदुच्चरितः सकृदर्थं गमयतीति नियमात्" इत्याचक्षाणः सैन्धवशब्दौ भिन्नौ समानानुपूर्वीकशब्दैकत्वभ्रममात्रमिति ब्रूते।[55] तत्रैव सामान्यं द्विविधं जातिरूपमुपाधिरूपञ्चेति तार्किकमतमपि निराकृत्य तार्किकोक्तजातिबाधकस्यापि खण्डनं कुरुते।[56]

4.8 विशेषनिरूपणे तार्किकमतमुपस्थाप्य "तव मते विनापि व्यावर्तकधर्मं यथा विशेषाणां व्यावृत्तिः स्वत एव व्यावृत्तत्वात् तथा मन्मते परमाणूनामपि स्वत एव व्यावृत्तिर्भविष्यति" इत्याचक्षाणो विशेषपदार्थं खण्डयति।[57]

4.9 समवायनिरूपणे तार्किकमते समवायस्यातिरिक्तपदार्थत्वं प्रतिपाद्य शाब्दिकमते समवायो न पदार्थान्तरमिति प्रतिपादयितुं मानाभावमभिधत्ते।[58]

4.10 अभावनिरूपणे तार्किकमते अभावस्य पदार्थान्तरत्वमुक्त्वा तद्भेदांश्च निरूप्य शाब्दिकमते अभावस्य केवलाधिकरणस्वरूपेणैवोपपत्तिं दर्शयन् तस्यातिरिक्तत्वे मानाभावं दर्शयति।[59]

4.11 पदार्थनिरूपणस्यान्तिमे भागे सत्तर्कासत्तर्कविचारप्रसङ्गे तार्किकोक्तपदार्थानां शाब्दिकोक्तपदार्थानां च युक्तायुक्तत्वं निरूपयन् पदार्थानां नित्यानित्यत्वं तार्किकशाब्दिकसिद्धान्तदृष्ट्या समीक्षते।[60] ततः परं च भावकार्याणामुत्पत्तिविषये

---

53. श.त., ग्रन्थांशः 10.1
54. श.त., ग्रन्थांशः 10.2-10.6
55. श.त., ग्रन्थांशः 10.7-10.8
56. श.त., ग्रन्थांशः 10.9-10.10
57. श.त., ग्रन्थांशः 11.1-11.2
58. श.त., ग्रन्थांशः 12.1-12.2
59. श.त., ग्रन्थांशः 13.1-13.6
60. श.त., ग्रन्थांशः 14

कार्यकारणभावस्य विशदं विवेचनं कुर्वाणः[61] सृष्टिप्रक्रियां दर्शयन् प्रत्यक्षप्रमाण-निरूपणप्रसङ्गे समारब्धां पदार्थविचारणामुपसंहरति।[62]

4.12 अनुमाननिरूपणे तार्किकसिद्धान्तं निरूप्य शाब्दिकमतेऽनुमितिर्न जातिरपितु सङ्केतविशेषसम्बन्धेन योगरूढोऽनुमितिशब्द इति प्रतिपादयति।[63] ततः पश्चाच्च पक्षतालक्षणं विचारयन् सिषाधयिषाविरहविशिष्टेति पक्षतालक्षणघटकाभाव-प्रतियोगिसिद्धिविशेषणस्य शाब्दिकानभिमतत्वं निरूपयति।[64] अनुमाननिरूपणप्रङ्गे अनुमानस्य प्रामाण्यं खण्डयन् "**प्रत्यक्षशब्दयोः प्रत्यक्षेण आप्तवाक्येन स्वीकृत्यानुमानं खण्डितं शाब्दिकैः।**" परार्थानुमानं पञ्चावयववाक्यजन्यमपि शब्द एव। यदि अनुमाने आग्रहश्चेत् तर्हि व्यवहारेण साधारणरूपं लिङ्गं ज्ञात्वा लिङ्गिज्ञानं येन तदनुमानम्" इति ब्रवीति।[65] अनुमाननिरूपण एव तार्किकाभिमतायां हेत्वाभासविचारणायां दोषान् प्रदर्शयन्[66] तार्किकप्रतिपादितमुपाधित्रैविध्यमपि निराकृत्य उपाधेश्चातुर्विध्यं निरूपयति।[67]

4.13 उपमाननिरूपणे तार्किकानुसारमुपमानप्रमाणं विविच्य[68] शाब्दिकानां मते उपमितिर्न मानान्तरमिति प्रतिपादयन् उपमानस्य पृथक् प्रामाण्यं खण्डयति।[69] अत्रोपमितेर्मानसत्वं प्रतिपाद्य अनुमितेरपि मानसत्वं प्रतिपादयन् अनुमानस्य प्रमाणान्तरत्वं पुनरपि खण्डयति।[70] उपमानस्य प्रामाण्यखण्डनप्रसङ्गे उपमितेः शाब्देऽप्यन्तर्भावः

---

61. श.त., ग्रन्थांशः 15.1-15.6
62. श.त., ग्रन्थांशः 15.7-15.9
63. श.त., ग्रन्थांशः 16.1-16.4
64. श.त., ग्रन्थांशः 16.5-16.7
65. श.त., ग्रन्थांशः 17.13-17.14
66. श.त., ग्रन्थांशः 17.1-17.12
67. श.त., ग्रन्थांशः 16.15
68. श.त., ग्रन्थांशः 18.1
69. श.त., ग्रन्थांशः 18.2
70. श.त., ग्रन्थांशः तत्रैव

कर्तुं शक्यत इत्यपि विकल्पं प्रस्तौति।[71]

4.14 शब्दप्रमाणनिरूपणे तार्किकाणां मतमुपस्थाप्य[72] शाब्दिकानां मते "तत्तदर्थबोधकवाक्यज्ञानमेव शाब्दप्रमाकरणम्" इति युक्तियुक्तं प्रतिपादयति।[73] पुनश्च वाक्यशक्तिवादं सप्रपञ्चं निरूपयति।[74] शक्तिस्वरूपनिरूपणक्रमे मीमांसकानां नैयायिकानां च मतमुपवर्ण्य[75] "शाब्दिकानां मते शब्दार्थयोरनादिः सम्बन्ध एव शक्तिः। अथवा बोधकत्वमेव शक्तिः" इति प्रतिपादयति। वाक्य एव शक्तिरिति निरूपयन् वाक्यशक्तिपक्षे मीमांसकैः सह वैयाकरणानामांशिकमानुकूल्यमपि प्रदर्शयति।[76] तार्किकैरपि वाक्य एव शक्तिः स्वीकार्येति ब्रुवन् तदस्वीकारे तार्किकमते कतिचन दोषानुपस्थापयति।[77] ततः परञ्च बोधकत्वरूपा शक्तिरसाधुवाक्येऽपि वर्तत एवेति प्रतिपाद्य वह्निना सिञ्चतीत्यादिष्वपि शक्तिं प्रतिपादयन् योग्यतायाः शाब्दबोधं प्रति कारणत्वं खण्डयति।[78] ततः परं च सङ्क्षेपेण वर्ण-पद-वाक्यानामभिव्यक्तिप्रकारं प्रदर्श्य वाक्यस्य वर्णपदादिभ्योऽतिरिक्तत्वं प्रदर्शयति।[79]

4.15 लक्षणानिरूपणे तार्किकमतं प्रस्तुवन् गङ्गायां घोष इत्यत्र जहदजहल्लक्षणेति तार्किकाभिप्रेतं खण्डयन् नेयं जहल्लक्षणा किन्त्वजहत्स्वार्था गङ्गासम्बन्धितीर इति बोधादिति प्रतिपादयति।[80] एवञ्च रूढिलक्षणायामेव जहत्स्वार्था

---

71. श.त., ग्रन्थांशः 18.4
72. श.त., ग्रन्थांशः 19.1-19.2
73. श.त., ग्रन्थांशः 19.3
74. श.त., ग्रन्थांशः 19.4-19.5
75. श.त., ग्रन्थांशः 20.1
76. श.त., ग्रन्थांशः 20.2-20.3
77. श.त., ग्रन्थांशः 20.4
78. श.त., ग्रन्थांशः 20.5
79. श.त., ग्रन्थांशः 20.7
80. श.त., ग्रन्थांशः 21.1

प्रयोजनवत्यां तु अजहत्स्वार्थैवेति विवेकं दर्शयति।[81] राजपुरुषादौ तु शक्तिरेवेति प्रतिपादयन् समाससामान्ये सर्वत्र शक्तिरेवेति निरूपयन् समासविषये लक्षणावादिनां तार्किकाणां मतं खण्डयति।[82]

4.16 वाक्यार्थबोधनिरूपणे तार्किकमतानुसारं शाब्दबोधं प्रदर्श्य[83] व्याकरणदर्शनानुरूपं शाब्दपद्धतिं वर्णयति।[84] वाक्ये मुख्यविशेष्यताविषये तार्किकाभिप्रेतं प्रथमान्तमुख्यविशेष्यकबोधसिद्धान्तं खण्डयन् कर्तरि कर्मणि च प्रयोगे व्याकरणदर्शनानुरूपं व्यापारमुख्यविशेष्यकं बोधं निरूपयति।[85] आख्यातार्थसङ्ख्या–प्रकारकबोधे प्रथमान्तपदजन्योपस्थितेः कारणत्वपि खण्डयति।[86]

4.17 लकारार्थनिरूपणे प्रथमं 'देवदत्तः तण्डुलं पचति' इत्यत्र क्रियामुख्य–विशेष्यकं शाब्दबोधं प्रदर्श्य तत्र मीमांसकमतमुपस्थाप्य आश्रयस्य लक्षणयाऽक्षेपाद् वा बोध्यत्वे दोषमुद्भावयति।[87] ततश्च लटः कुत्र वर्तमानत्वमर्थः कुत्र भूतत्वमर्थः कुत्र च भविष्यत्त्वमर्थ इति विचारयति।[88] एवमेव लृट्लकारस्य भविष्यद्वर्तमान–रूपावर्थौ विचारयति।[89] एवमेव लृट्लकारस्य भविष्यद्वर्तमानत्वरूपमर्थं प्रतिपादयति।[90] ततश्च 'भूतभविष्यद्वर्तमानास्सन्ति' इति वाक्येन बौद्धं वर्तमानत्वं निरूप्यात्र पक्षान्तरमप्युपस्थापयति।[91] एवमेवान्येषां लकाराणामप्यर्थं निरूपयति।[92]

---

81. तदेव
82. श.त., ग्रन्थांशः 21.2-21.3
83. श.त., ग्रन्थांशः 22.1
84. श.त., ग्रन्थांशः 22.2-22.3
85. तदेव
86. श.त., ग्रन्थांशः 22.4
87. श.त., ग्रन्थांशः 23.1
88. श.त., ग्रन्थांशः 23.2
89. श.त., ग्रन्थांशः 23.3
90. तदेव
91. श.त., ग्रन्थांशः 22.4
92. श.त., ग्रन्थांशः 23.5-23.6

4.18 सन्प्रत्ययार्थं व्याचक्षाणः प्रथमं पूर्वपक्षमुक्त्वा तं खण्डयंश्च धात्वर्थविशेषितैवेच्छा सन्प्रत्ययार्थः, चिकीर्ष्यते पाक इत्यादौ त्वनुकूलक्रियाविषयिणीच्छा सन्नन्तधात्वर्थ इति प्रतिपादयति।[93]

4.19 क्यजादीनामर्थं प्रतिपादयन् गदाधरमतं – क्यजादीनामिच्छैवार्थ इति खण्डयति।[94] ततश्च यङर्थनिरूपणावसरे पौनःपुन्यबाहुल्यकौटिल्यादीनि यङ्द्योत्यानीति ब्रवीति।[95]

4.20 कृदर्थं निरूपयन् भावकृत्सु धात्वर्थानुवादकत्वमात्रं प्रत्ययेन विधीयते इति प्रतिपादयति।[96] क्त्वार्थो भाव एव इति प्रतिपादयन् समानकर्तृकत्वं पूर्वकालीनत्वं च क्त्वाद्योत्यमिति निरूपयति।[97] अत्र नैयायिकनव्यानां मतं – समानकालीनत्वं पूर्वकालत्वं च क्त्वावाच्यमिति खण्डयति।[98] एवमेव तुमुन्–शतृशानजादीनामर्थं प्रतिपादयन्[99] आख्यातार्थविषये तार्किकमतं पुनरुपस्थाप्य निराकरोति।[100] अन्ते च वाक्य एव शक्तिरिति मतं पुनः स्थापयन् तत्त्वमसीति वाक्यं सप्रसङ्गमानीय ग्रन्थमुपसंहरति।[101]

5. व्याकरणदर्शनकृतिषु शब्दार्थतर्कामृतस्य स्थानम्

यद्यपि व्याकरणदर्शनस्य प्रतिपादका नैके ग्रन्थाः सन्ति। तथाऽपि मौनिश्रीकृष्णभट्टस्यायं ग्रन्थः विषयप्रतिपादनदृष्ट्या अवश्यमेव स्वकीयं वैशिष्ट्यमादधाति। उपलब्धेषु व्याकरणदर्शनग्रन्थेषु प्रमाणप्रमेयविषयिणी विचारणा क्रमेण न तथा लभ्यते यथा शब्दार्थतर्कामृते। यद्यपि महाभाष्ये व्याकरणदर्शनस्य

---

93. श.त., ग्रन्थांशः 24.1
94. श.त., ग्रन्थांशः 24.1
95. श.त., ग्रन्थांशः 24.3
96. श.त., ग्रन्थांशः 25.1
97. श.त., ग्रन्थांशः 25.2
98. श.त., ग्रन्थांशः 25.3
99. श.त., ग्रन्थांशः 25.4-25.5
100. तदेव
101. तदेव

प्रायेण समेऽपि विषया विचारिता लभ्यन्ते अतस्तत्र प्रमाणप्रमेयविचारोऽपि यथाप्रसङ्गं लभ्यत एव। तथापि महाभाष्यस्य भिन्नोद्देश्यकत्वात् तत्रेयं विचारणा एवंक्रमेण कर्तुमशक्यैवासीत्। वाक्यपदीयं यद्यपि व्याकरणदर्शनस्य महान् ग्रन्थस्तत्र च वर्तन्ते प्रमाणप्रमेयविषये व्याकरणदर्शनस्य भूयांसो विचारास्तथापि तस्य नैकदर्शनैः सह सामञ्जस्यसंस्थापनदृष्टिपरत्वात् तत्रापि परमतखण्डनपूर्वकं स्वमतस्थापनधिया एवं क्रमेण प्रमाणप्रमेयविषयिणी तथा विचारणा न कृता यथा शब्दार्थतर्कामृते। शब्दकौस्तुभे व्याकरणस्य नैके दार्शनिका विषयाः परमतखण्डनपूर्वकं स्वमतस्थापनधिया यद्यपि विचारितास्तथापि शब्दकौस्तुभस्य सूत्रव्याख्यानपरत्वात् तत्रापि नोपलभ्यते प्रमाणप्रमेयविषयिणी तथा विचारणा यथा शब्दार्थतर्कामृते। वैयाकरणमतोन्मज्जनस्य प्रायेण शाब्दबोधविषयप्रतिपादकत्वात् तत्रापि प्रमाणान्तरविषयिणी विचारणा तथा नैव कृताऽस्ति यथा शब्दार्थतर्कामृते। यद्यपि श्रीकौण्डभट्टस्य श्रीमन्नागेशभट्टस्य च ग्रन्थेष्वेतादृशा विचारा लभ्यन्ते तथापि तत्र एवंक्रमेण प्रमाणप्रमेयमेवाश्रित्य विमर्शो नास्ति । अत एवं वक्तुं शक्यते यद् श्रीमौनिश्रीकृष्णभट्स्यायं ग्रन्थो व्याकरणदर्शनस्य प्रमाणप्रमेयविषयको महत्त्वपूर्णो ग्रन्थविशेषोऽस्ति। यद्यप्यत्र समागता विचाराः प्रायेण व्याकरणदर्शनस्य पूर्वाचार्यकृतेषु ग्रन्थेषु प्राप्यन्ते। तत्र केचन विचाराः मौनिश्रीकृष्णभट्टेन स्वप्रतिभया नूतनतया विमृष्टाः सन्ति। मौनिकृष्णात् परं नैकानि कार्याणि अस्यां दिशि सञ्जातानि येषां विषये पृथग्रूपेण चर्चा विधास्यते। तत्र प्रमाणविषयेऽस्मद्गुरुवर्यैराचार्यरामप्रसादत्रिपाठिभिर्विंशशताब्द्यां कृतो ग्रन्थः – "पाणिनीयव्याकरणे प्रमाणसमीक्षा" व्याकरणदर्शने प्रमाणविचारेऽतीव महत्त्वपूर्णं स्थानमादधातीति शम्।

सङ्केताः सन्दर्भग्रन्थसूची च

1. **N.C.C.** - New Catalogus Catalogorum
2. **पस्प.**- पस्पशाह्निकम् , नवाह्निकमहाभाष्यम्, गुरुप्रसादशास्त्रिग्रन्थमाला 1, वाराणसी, ई. 1988
3. **बृ. वै.भू.** – बृहद् वैयाकरणभूषणम्, सम्पा. श्रीमनुदेवभट्टाचार्य, चौखम्बा अमरभारतीप्रकाशन, ई. 1985
4. **भर्तृ.** भतृहरि प्राचीन टीकाओं के आलोक में वाक्यपदीय का एक अध्ययन, अनुवाद Bhartrihari : A Study Of Valyapadiya in the light of some

ancient Commentaries लेखक के.ए.सुब्रह्मण्यम् अय्यर, अनु. डा. रामचन्द्र द्विवेदी, राजस्थान हिन्दी ग्रन्थ अकादमी ई.1981.

5. मभा.- महाभाष्यम्, प्रथमो भागः, गुरुप्रसादशास्त्रिग्रन्थमाला 1, वाराणसी, ई.1988

6. ल.वि.नि. लघुविभक्त्यर्थनिर्णयः, वादार्थसंगहः, तृतीयो भागः सम्पा.वाक्रे इत्युपाह्वो गङ्गाधरभट्टसुतमहादेवशर्मा, गुजरातीमुद्रणालय, ई.1915

7. वा.प. वाक्यपदीयम् , द्वितीयो भागः, वाक्यकाण्डम् , श्रीरघुनाथशर्मप्रणीतया अम्बाकर्त्रीव्याख्यया सहितम्, सरस्वतीभवनग्रन्थमाला 91, ई. 1980

8. वा.सं. वादार्थसंग्रहः,प्रथमो भागः सम्पा.वाक्रे इत्युपाह्वो गङ्गाधरभट्टसुतमहादेवशर्मा, गुजरातीमुद्रणालयः, ई.1913

9. वा.सं. वादार्थसंग्रहः,तृतीयो भागः, सम्पा.वाक्रे इत्युपाह्वो गङ्गाधरभट्टसुतमहादेवशर्मा, गुजरातीमुद्रणालयः, ई.1915

10. वृ. दी. – वृत्तिदीपिका, सम्पादको भारद्वाजो गङ्गाधरशास्त्री, प्रिन्सेस आफ वेल्स सरस्वतीभवनग्रन्थमालायाः एकोनत्रिंशत्तमो ग्रन्थः, ई.1930

11. वै.म. वैयाकरणमतोन्मज्जनम्, वैयाकरणमतोन्मज्जनटीका, सम्पा. ललित कुमार त्रिपाठी, भारत भूषण त्रिपाठी, भारतीयविद्यासंस्थानम्, वाराणसी, 1998

12. वै.म.टी वैयाकरणमतोन्मज्जनटीका , सम्पा. ललितकुमारत्रिपाठी, भारतभूषणत्रिपाठी, भारतीयविद्यासंस्थानम्, वाराणसी, 1998

13. श.त.- शब्दार्थतर्कामृतम्, सम्पा. ललित कुमार त्रिपाठी, Journal Of G.N.Jha Kendriya Sanskrita Vidyapeetha, 2007 इत्याख्यशोधपत्रिकायाः 63 भागस्य परिशिष्टाङ्गभूतम्

14. संव्या. इति.- संस्कृत व्याकरणशास्त्र का इतिहास, ले. युधिष्ठिर मीमांसक, रामलालकपूरट्रस्ट, तृतीय संस्क. सं. 2030

15. स्फो.च. स्फोटचन्द्रिका, वादार्थसंगहः, प्रथमो भागः, सम्पा.वाक्रे इत्युपाह्वो गङ्गाधरभट्टसुतमहादेवशर्मा, गुजरातीमुद्रणालयः, ई. 1913

सम्पादकः

□□

द्वितीय संस्करण की प्रस्तावना

।। श्री सच्चामहापुरुषाय नमः ।।

।। मातृपितृचरणकमलेभ्यो नमः ।।

।। श्री गुरुभ्यो नमः ।।

1. व्याकरणदर्शन परम्परा में शब्दार्थतर्कामृतम्

पाणिनीय व्याकरण सम्प्रदाय में व्याकरणदर्शन की परम्परा भी उतनी ही पुरानी है जितनी महर्षि पाणिनि की अष्टाध्यायी। व्याडि ने व्याकरणदर्शन की अमूल्य कृति 'सङ्ग्रह' की रचना की थी, जो अब उपलब्ध नहीं है। सम्प्रति व्याकरणदर्शन के स्रोतग्रन्थ के रूप में महर्षि पतञ्जलि का महाभाष्य एवं भर्तृहरि का वाक्यपदीयम् महत्त्वपूर्ण प्रतिष्ठित कृतियाँ है। इन ग्रन्थों एवं इनके टीकाग्रन्थों के अतिरिक्त भी व्याकरण दर्शन के अनेक ग्रन्थों की रचना प्रसिद्ध वैयाकरणों द्वारा की गयी है। इनमें भट्टोजिदीक्षित का वैयाकरणमतोन्मज्जनम् तथा उस पर महत्त्वपूर्ण तीन टीकाग्रन्थ – वनमालिमिश्र की वैयाकरणमतोन्मज्जनटीका, कौण्डभट्ट का वैयाकरणभूषणम् तथा वैयाकरणभूषणसारः व्याकरणदर्शन के महत्त्वपूर्ण कार्य हैं। इसके पश्चात् व्याकरणदर्शन के क्षेत्र में नागेशभट्टविरचित वैयाकरणसिद्धान्तमञ्जूषा तथा वैयाकरणसिद्धान्तलघुमञ्जूषा का व्याकरणदर्शन में महत्त्वपूर्ण स्थान है। नागेशभट्ट के उपरान्त वैयाकरणदार्शनिकों में मौनिश्रीकृष्णभट्ट की रचनाएँ भी अपने मौलिक चिन्तन एवं क्रान्तिकारी विचारों के लिए उल्लेखनीय हैं। मौनिश्रीकृष्णभट्ट ने व्याकरणदर्शन के क्षेत्र में प्रमुखतः पाँच ग्रन्थों की रचना की है –1. स्फोटचन्द्रिका 2. लघुविभक्त्यर्थनिर्णयः 3. वृत्तिदीपिका 4. आख्यातवादः 5. शब्दार्थतर्कामृतम्। इनमें स्फोटचन्द्रिका लघुविभक्त्यर्थनिर्णयः तथा वृत्तिदीपिका का प्रकाशन हो चुका है। मौनिश्रीकृष्णभट्ट का आख्यातवादः प्रकृत लेखक के

संज्ञान में अभी तक नहीं आया है। शब्दार्थतर्कामृतम् सन् 2009 के पूर्व तक अप्रकाशित था। 'लघुविभक्त्यर्थनिर्णयः' के सम्पादक महादेवशर्मा वाक्रे तथा वृत्तिदीपिका के सम्पादक भारद्वाज गङ्गाधर शास्त्री ने अपनी अपनी प्रस्तवाना में शब्दार्थतर्कामृतम् के हस्तलेख प्राप्त न होने का उल्लेख किया है। सौभाग्यवशात् शब्दार्थतर्कामृतम् का सम्पूर्ण हस्तलेख राष्ट्रिय संस्कृत संस्थान के गङ्गानाथ झा परिसर में प्राप्त हो गया, जिसके अन्य अपूर्ण हस्तलेख सरस्वतीभवन पुस्तकालय, वाराणसी से प्राप्त हुए। इस ग्रन्थ का सम्पादन कार्य राष्ट्रिय संस्कृत संस्थान के गङ्गानाथ झा परिसर में किया गया, जिसे सर्वप्रथम Journal Of G.N.Jha Kendriya Sanskrita Vidyapeetha, LXIII (1-4) January-December, 2007 के अंक में सन् 2009 में उसी के अङ्ग के रूप में प्रकाशित किया गया। मौनिश्रीकृष्णभट्ट का शब्दार्थतर्कामृतम् व्याकरणदर्शन के प्रमाण एवं प्रमेय पक्ष पर मीमांसा करने वाला महत्त्वपूर्ण ग्रन्थ है। शब्दार्थतर्कामृतम् में मौनिश्रीकृष्णभट्ट ने प्रमाण एवं प्रमेय से सम्बद्ध विषयों पर न्याय वैशेषिक मत का खण्डन करते हुए व्याकरणदर्शन के सिद्धान्त का प्रतिपादन किया है। व्याकरणदर्शन के सिद्धान्त का प्रतिपादन करते हुए ग्रन्थकार ने अनेक स्थलों में अपने मौलिक विचार भी रखे हैं। ग्रन्थकार ने शब्दार्थतर्कामृतम् के प्रतिपाद्य विषयों को प्रत्यक्ष अनुमान उपमान एवं शब्द निरूपण के अन्तर्गत प्रतिपादित किया है। प्रत्यक्षनिरूपण के अन्तर्गत ही व्याकरणदर्शन के अनुसार पदार्थविचार भी किया गया किया है।

2. शब्दार्थतर्कामृतम् में मङ्गलवाद

मौनिश्रीकृष्णभट्ट ने शब्दार्थतर्कामृतम् का आरम्भ मङ्गलश्लोक के साथ करते हुए नैयायिकों के मङ्गलवाद पर अपना मतभेद प्रदर्शित किया है। नैयायिकों ने मङ्गल एवं विनायकस्तवपाठ इन दोंनो को पृथक् पृथक् रूप से विघ्नविघात के प्रति कारण माना है। नैयायिकों के अनुसार मङ्गल के पश्चात् होने वाले विघ्नध्वंस के प्रति मङ्गल कारण है तथा विनायकस्तवपाठ से उत्तर होने वाले विघ्नध्वंस के प्रति विनायकस्तवपाठ कारण है। इस सन्दर्भ में मौनिश्रीकृष्णभट्ट का कथन है कि गणेशस्तवपाठ भी मङ्गलरूप ही है। अतः पृथक् कार्यकारणभाव मानने की कोई आवश्यकता नहीं है। मौनिश्रीकृष्णभट्ट ने मङ्गल का लक्षण ही इस प्रकार

किया है जिससे विनायकस्तवपाठ भी मङ्गललक्षण का लक्ष्य हो जाता है। मौनिश्रीकृष्णभट्ट ने नैयायिकों के इस कथन की भी आलोचना की है कि मङ्गल से उत्तर होने वाले विघ्नध्वंस के प्रति मङ्गल कारण है तथा विनायकस्तवपाठ से उत्तर होने वाले विघ्नध्वंस के प्रति विनायकस्तवपाठ कारण है। ग्रन्थकार का कहना है कि नैयायिकों द्वारा भिन्न कार्यकारणभाव की कल्पना गौरवग्रस्त है। विशिष्ट को कार्यतावच्छेदक मानना तो गौरवग्रस्त है ही। विनायकस्तवपाठ को मङ्गल मान लेने में कोई बाधा नहीं है।

3. शब्दार्थतर्कामृतम् में प्रमाणविचार

3.1 प्रमाण के सन्दर्भ में मौनिश्रीकृष्णभट्ट के विचार बहुत ही क्रान्तिकारी हैं। मौनिश्रीकृष्णभट्ट ने व्याकरणदर्शन के अनुसार प्रत्यक्ष एवं शब्द दो ही प्रमाण माने हैं। तार्किकों के अनुसार प्रत्यक्ष के दो प्रकार हैं – नित्यप्रत्यक्ष तथा अनित्यप्रत्यक्ष। नित्यप्रत्यक्ष ईश्वरीय प्रत्यक्ष है। तद्भिन्न प्रत्यक्ष अनित्य प्रत्यक्ष है। तार्किकों के अनुसार अनित्य प्रत्यक्ष के दो भेद हैं निर्विकल्पक प्रत्यक्ष तथा सविकल्पक प्रत्यक्ष। मौनिश्रीकृष्णभट्ट ने तार्किकों द्वारा स्वीकृत निर्विकल्पक प्रत्यक्ष का खण्डन किया है।

3.2 अनुमान के सन्दर्भ में तार्किकों के मत का खण्डन करते हुए मौनिश्रीकृष्णभट्ट ने अनुमितित्व की जातिरूपता का खण्डन किया है। इनके अनुसार सङ्केतविशेषसम्बन्ध से परामर्शव्यापारक लिङ्गज्ञान से जन्य ज्ञान के पश्चात् होने वाला ज्ञान ही अनुमिति है। इस प्रकार अनुमिति शब्द पङ्कज शब्द की तरह योगरूढ है। ग्रन्थकार ने अनुमिति को मानस ज्ञान माना है। उनका कहना है कि जिस प्रकार 'सुरभि चन्दनम्' में सौरभ का अलौकिक प्रत्यक्ष होता है उसी प्रकार अनुमिति स्थल में भी पर्वत में वह्नि का अलौकिक प्रत्यक्ष स्वीकार कर लेने मात्र से पर्वतो वह्निमान् यह मानस ज्ञान हो जाएगा। इसके लिए अनुमिति को पृथक् प्रमा मानने की कोई आवश्यकता नहीं है। अतः अनुमान पृथक् प्रमाण नहीं है। उल्लेखनीय है कि मौनिश्रीकृष्णभट्ट ने केवलव्यतिरेकी अनुमान का सर्वथा खण्डन कर दिया है।

3.4 उपमान के सन्दर्भ में भी मौनिश्रीकृष्णभट्ट का कथन है कि उपमान भी पृथक् प्रमाण नहीं है। इनके अनुसार उपमिति भी एक प्रकार का मानस ज्ञान ही है। इन्होंने उपमिति को शाब्दज्ञान के रूप में मानने का भी विकल्प रखा है। ग्रन्थकार ने उपमान को पृथक् प्रमाण न मानने मे एक तर्क यह भी दिया है कि शक्तिज्ञान के उपाय व्याकरण, उपमान, कोश, आप्तवाक्य, व्यवहार, वाक्यशेष तथा विवृति में उपमान को पृथक् प्रमाण मान लिया जाता है तो अन्य उपायों को भी स्वतन्त्र प्रमाण मानना होगा।

3.5 शब्दप्रमाण के सन्दर्भ में मौनिश्रीकृष्णभट्ट ने व्याकरणसिद्धान्त का निरूपण करते हुए कहा कि तत्तदर्थबोधक वाक्यज्ञान ही शाब्दप्रमा का करण है। मौनिश्रीकृष्ण भट्ट ने व्याकरणसिद्धान्त के अनुसार वाक्य में ही शक्ति माना है। उनका कथन है कि व्यवहार से शक्तिग्रह का पक्ष तो सभी के लिए निर्विवाद है। व्यवहार में तो वाक्य का ही प्रयोग होता है। अतः वाक्य मे ही शक्ति मानना उचित है। यदि तार्किक यह कहें कि जिस प्रकार चन्द्रादि में अल्पता प्रत्यक्षसिद्ध होने पर भी शब्दप्रमाण से सिद्ध महत्ता से प्रत्यक्षसिद्ध अल्पता का बाध हो जाता है उसी प्रकार 'शक्तिग्रहं व्याकरणोपमान' इत्यादि वृद्ध गाथा में कथित व्यवहारशक्ति का पद में ही पर्यवसान होता है तो तार्किकों की यह युक्ति भी साध्वी नहीं है। ऐसा मानने पर तो व्यवहार की शक्तिग्राहकता ही उच्छिन्न हो जाएगी। वस्तुतः पदशक्तिग्रह में नैयायिकों द्वारा दर्शित लाघव ही कल्पनागौरवग्रस्त होने से असिद्ध है। प्रथमतः प्रयोज्यप्रयोजक वृद्धों के व्यवहार से तटस्थ के द्वारा अनुमानप्रमाणगम्य वाक्यशक्तिग्रह का अवाप एवं उद्वाप के द्वारा त्याग करना, पदशक्ति की कल्पना करना, शब्दप्रमाणगम्य वाक्यशक्तिग्राहकव्यवहार का त्याग करना तथा वृद्धोक्तगाथा में अनुक्त अवाप एवं उद्वाप की कल्पना करना पदशक्तिपक्ष में कल्पनागौरव हैं। इस प्रकार के कल्पनागौरव की अपेक्षा वाक्य में ही शक्ति मानना उचित है। व्याकरणशास्त्र द्वारा पद, प्रकृति तथा प्रत्यय में शक्ति की कल्पना तो वाक्यार्थज्ञान के उपाय के रूप में है। जिस प्रकार अन्नमय, प्राणमय, मनोमय, विज्ञानमय तथा आनन्दमय कोशों में ब्रह्मरूपता का प्रतिपादन ब्रह्मज्ञान के उपाय के लिए किया जाता है, जिस प्रकार स्थूल नक्षत्र में अरुन्धती का प्रतिपादन अरुन्धती के ज्ञान के उपाय के रूप में किया जाता है तथा जिस प्रकार रेखागवय में गवय का प्रतिपादन

गवयज्ञान के उपाय के रूप में किया जाता है उसी प्रकार वैयाकरणों द्वारा पद, प्रकृति एवं प्रत्यय में शक्ति की कल्पना वाक्यशक्ति के ज्ञान के उपाय के रूप में की जाती है। अतः तार्किकों द्वारा वाक्य में शक्ति न मानना अनुचित है। वाक्य में शक्ति न मानने वाले तार्किकों के मत में तत्त्वमसि इत्यादि महावाक्यों में वृत्ति न होने के कारण इन महावाक्यों से निःश्रेयसाधिगम भी बाधित हो जाएगा। अतः वाक्य में शक्ति मानना आवश्यक है। मौनिश्रीकृष्णभट्ट द्वारा प्रमाण के सन्दर्भ में कुछ प्रमुख बिन्दुओं पर यहाँ चर्चा की गयी है। इनके अतिरिक्त प्रमाणसम्बद्ध अन्य बिन्दुओं पर भी ग्रन्थकार ने तार्किक सिद्धान्त से अपना मतभेद प्रदर्शित किया है।

4. शब्दार्थतर्कामृतम् में पदार्थविचार

मौनिश्रीकृष्ण भट्ट ने शब्दार्थतर्कामृतम् में प्रत्यक्षनिरूपण के अन्तर्गत ही पदार्थनिरूपण किया है। वैयाकरणों के द्वारा पदार्थ के विषय में विचार-विमर्श करने की क्या आवश्यकता है इस आशङ्का का समाधान करते हुए मौनिश्रीकृष्णभट्ट का स्पष्ट कथन है कि वैयाकरणों के द्वारा पदार्थ के सन्दर्भ में विमर्श करना अनुचित नहीं है, क्योंकि पदार्थ चिन्तन के विना प्रयोगसिद्धि नहीं की जा सकती है। अतः वैयाकरणों के द्वारा पदार्थ के विषय में विचार-विमर्श करना तथा अन्य मतों की परीक्षा करते हुए स्वाभिमत प्रकाशित करना सर्वथा उचित है। मौनिश्रीकृष्णभट्ट व्याकरणदर्शन के अनुसार द्रव्य एवं अद्रव्य के भेद से पदार्थ के दो भेद करते हैं। मौनिश्रीकृष्णभट्ट का कथन है कि तार्किकों के द्वारा पदार्थ के सात भेद घटादि उपाधियों के समान व्यर्थ हैं। मौनिश्रीकृष्णभट्ट का यह भी कहना है कि व्याकरणदर्शन के अनुसार 'चादयोऽसत्त्वे' सूत्र में असत्त्व शब्द से असत्त्व अर्थात् द्रव्य भिन्न शब्द में प्रतियोगी के रूप में आए द्रव्य शब्द से सातों पदार्थों का ग्रहण होता है। पाकः इत्यादि उदाहरणों में घञ्प्रत्ययार्थ भाव भी द्रव्य है।

4.1 तार्किकों ने द्रव्य का परिगणन पृथिवी, जल, तेज, वायु, आकाश काल, दिक् तथा आत्मा के रूप में किया है। मौनिश्रीकृष्णभट्ट के अनुसार यह परिगणन भी उचित नहीं है, क्योंकि इसमें कोई प्रमाण नहीं है। ग्रन्थकार ने पदार्थनिरूपण क्रम में द्रव्यनिरूपण करते हुए द्रव्यत्व जाति का खण्डन किया है। ग्रन्थकार का कथन है कि जिस प्रकार सुखजनक कार्य के प्रति धर्म की तथा दुःखजनक कार्य

के प्रति अधर्म की कारणता आवश्यक होने पर भी तार्किकों द्वारा कार्यसामान्य के प्रति अदृष्ट को कारण नहीं माना जाता है उसी प्रकार गन्धादि कार्य के प्रति पृथिव्यादि की कारणता होने पर भी कार्य सामान्य के प्रति द्रव्यत्वेन द्रव्य की कारणता मानना उचित नहीं है। मौनिश्रीकृष्णभट्ट ने वैयाकरणों के द्वारा परिभाषित द्रव्यलक्षण को ही समुचित मानकर न्यायवैशेषिक दर्शन में प्रतिपादित द्रव्यलक्षण का खण्डन किया है।

4.1.1 न्यायवैशेषिकदर्शन में पृथिवी, जल, तेज, वायु, आकाश, काल, दिक्, आत्मा तथा मन ये नव द्रव्य माने गए हैं। मौनिश्रीकृष्ण भट्ट पृथिवी, जल, तेज तथा वायु के सन्दर्भ में कोई चर्चा नहीं करते हैं, किन्तु वे तार्किकों के दिक् एवं काल द्रव्य पर अपनी असम्मति व्यक्त करते हैं। मौनिश्रीकृष्ण भट्ट का कथन है कि दिक् एवं काल वैयाकरणों के अनुसार अतिरिक्त द्रव्य नहीं हैं। रघुनाथ शिरोमणि ने दिक् और काल को ईश्वर से अतिरिक्त नहीं माना है, किन्तु मौनिश्रीकृष्णभट्ट रघुनाथ शिरोमणि के इस कथन कि दिक् एवं काल ईश्वररूप हैं, की भी आलोचना करते हैं।

4.1.2 तार्किक सिद्धान्त के अनुसार आकाश को नित्य माना गया है, किन्तु मौनिश्रीकृष्ण भट्ट का कथन है कि आकाश को नित्य मानना श्रुतिविरुद्ध है।

4.1.3 तार्किकों ने सगुण कपाल से निर्गुण घटोत्पत्ति का सिद्धान्त स्वीकार किया है। मौनिश्रीकृष्णभट्ट के अनुसार ऐसा अनुभव विरुद्ध है कि सगुण कपाल से निर्गुण घट की उत्पत्ति हो। मौनिश्रीकृष्णभट्ट का कथन है अनुभवविरुद्ध निर्गुणत्व की कल्पना की अपेक्षा अयुतसिद्ध पदार्थों में विशिष्टकारणता की कल्पना करना ही उचित है। अथवा जिस गुण के विना द्रव्य उपलब्ध ही न हो ऐसे गुण को द्रव्य से अतिरिक्त मानने की आवश्यकता ही नहीं है। वस्तुतः गुण को द्रव्य से पृथक् मानना ही अप्रामाणिक है।

4.1.4 मौनिश्रीकृष्णभट्ट ने आत्मा के विषय में भी तार्किक सिद्धान्त की आलोचना की है। मौनिश्रीकृष्णभट्ट ने आत्मा के विषय में विभिन्न मत मतान्तरों की चर्चा करते हुए यह प्रतिपादित किया कि कुछ दार्शनिकों के अनुसार आत्मत्व जाति नहीं है। क्योंकि आत्मत्व एक में रहने वाला धर्म है। तार्किकों के अनुसार

जाति तो अनेक में रहने वाला धर्म होता है। आत्मा एक है इस सन्दर्भ में मौनिश्रीकृष्णभट्ट ने श्रुति को प्रमाण के रूप में उद्धृत किया है। मौनिश्रीकृष्ण भट्ट ने विस्तार से आत्मा के स्वरूप के सन्दर्भ में तार्किक मत का खण्डन किया है तथा आत्मा के सन्दर्भ में वेदान्त मत का निरूपण किया है। प्राय: आत्मा के सन्दर्भ में वैयाकरणों का सिद्धान्त भी अद्वयसिद्धान्त जैसा ही है। मौनिश्रीकृष्ण भट्ट ने आत्मा के सन्दर्भ में शाब्दिकों के मत को शाब्दिकास्तु इस शब्द से उल्लेख नहीं किया है, जैसा वे प्राय: अन्य विषयों के निरूपण में करते हैं।

4.1.5 मौनिश्रीकृष्णभट्ट ने मन के सन्दर्भ में तार्किकों के इस मत का खण्डन किया है कि मन अतिरिक्त द्रव्य है। वे कहते हैं कि वैयाकरणों के अनुसार मन अतिरिक्त द्रव्य नहीं है, अपितु पृथिव्यादि के सात्त्विक अंश से उत्पन्न इन्द्रिय ही मन है। जिस प्रकार बाह्येन्द्रियाँ पाञ्चभौतिक हैं उसी प्रकार ही मन भी है। अन्तर केवल इतना है कि पृथिवी इत्यादि बाह्येन्द्रियाँ अलग अलग तत्त्वों से उत्पन्न हैं, किन्तु मन सभी पञ्चभूतों के सात्त्विक अंशों से उत्पन्न है। अत: मन को पृथक् द्रव्य के रूप में स्वीकार नहीं किया जा सकता है।

4.1.6 मौनिश्रीकृष्णभट्ट ने द्रव्य एवं गुण के प्रत्यक्ष के विषय में तार्किकों के सन्निकर्ष सिद्धान्त पर भी आक्षेप किया है। उन्होंने तार्किकों के इस सिद्धान्त का कि द्रव्य के प्रत्यक्ष के प्रति संयोग सन्निकर्ष है तथा गुण के प्रति संयुक्तसमवाय सन्निकर्ष है ,खण्डन कर दिया है।

4.1.7 मौनिश्रीकृष्णभट्ट ने तार्किकों के इस सिद्धान्त कि सुवर्ण तैजस द्रव्य है तथा हीरा पार्थिव द्रव्य है, का भी खण्डन किया है। मौनिश्रीकृष्णभट्ट का कथन है कि शाब्दिकों के अनुसार सुवर्ण पार्थिव द्रव्य है तथा हीरा तैजस तत्त्व है।

4.2 मौनिश्रीकृष्णभट्ट ने तार्किकों के अनुसार गुण का निरूपण कर उसका खण्डन किया है। तार्किकों के अनुसार गुणत्वजाति वाला गुण है। मौनिश्रीकृष्णभट्ट का कथन है कि गुणत्व जाति नहीं है। रूप रसादि में 'यह गुण है' ऐसा प्रत्यक्ष साधारणजन को तो होता नहीं है जिससे गुणत्व जाति की सिद्धि की जा सके। न ही द्रव्य एवं कर्म से भिन्न में रहने वाली कारणता के अवच्छेदक के रूप में गुणत्व जाति की सिद्धि की जा सकती है। ऐसा मानने पर तो द्रव्यकर्मोभय साधारण जाति

की सिद्धि होने लगेगी। अतः सङ्केतविशेषसम्बन्ध से गुणशब्दवत्व ही गुण है, ऐसा मानना चाहिए। अथवा द्रव्य भिन्न होता हुआ द्रव्य में समवाय सम्बन्ध से रहने वाला कृतिसाध्यत्वासाध्यत्वोभयत्व ही गुण है, ऐसा माना जा सकता है। मौनिश्रीकृष्णभट्ट ने इस प्रकार के गुण लक्षण को 'वोतो गुणवचनात्' सूत्र के भाष्य में पठित 'सत्त्वे निविशतेऽपैति पृथग् जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः' इस भाष्यकारिका से ध्वनित माना है।

4.2.1 मौनिश्रीकृष्णभट्ट ने तार्किकों के द्वारा प्रतिपादित चित्र रूप को अतिरिक्त रूप में स्वीकार करने की भी आलोचना की है। उनका कथन है कि वैयाकरणों के अनुसार चित्र रूप अतिरिक्त नहीं है, क्योंकि इसे अतिरिक्त मानने में कोई प्रमाण नहीं है।

4.3 मौनिश्रीकृष्णभट्ट ने तार्किकों के कर्मविषयिणी अवधारणा का भी खण्डन किया है। मौनिश्रीकृष्णभट्ट का कथन है कि कर्मत्व पदार्थविभाजक उपाधि नहीं है, क्योंकि वह धात्वर्थतावच्छेदकफलशाली कर्म का भी वाचक है। अतः कर्मत्व से कौन सा कर्मत्व ग्राह्य होगा यह संशयग्रस्त हो जाता है। दूसरी बात यह है कि कर्मत्व जाति नहीं है क्योंकि क्रियात्व से उसका साङ्कर्य हो जाता है। जैसे 'घटं पश्यसि' में घट में कर्मत्व है। कर्मत्व के अभावाधिकरण में अर्थात् जहाँ कर्मत्व नहीं हैं वहाँ क्रियात्व है जैसे 'इच्छति' में। कर्मत्व तथा क्रियात्व ये दोनों ही एकत्र भी हैं जैसे 'पश्य मृगो धावति' यहाँ धावति में क्रियात्व भी है तथा दर्शनक्रियानिरूपित कर्मत्व भी है। इस प्रकार परस्पर अत्यन्ताभाव के अधिकरण में रहने वाले धर्मों का एक स्थान पर समावेश रूप साङ्कर्य का लक्षण यहाँ घटित हो रहा है। अतः कर्मत्व को जाति न मानकर क्रियात्व को जाति मानना चाहिए। यह क्रियात्व फल में रहने वाली जन्यता से निरूपित जनकता का आश्रयत्वरूप है। धात्वर्थपरिच्छेदकत्व ही फलत्व है। अथवा काल में रहने वाली परिच्छेदकता से निरूपित परिच्छेदकत्व ही क्रियात्व है। अथवा सङ्केतविशेष सम्बन्ध से क्रियापदवत्त्व ही क्रियात्व है। तार्किकों के द्वारा क्रिया के पाँच प्रकार के कथन की आलोचना करते हुए मौनिश्रीकृष्णभट्ट ने कहा कि यदि क्रिया को पाँच प्रकार का माना जाएगा तो 'अस्ति' इत्यादि से वाच्य क्रिया का तार्किकों के द्वारा प्रतिपादित

क्रिया में अन्तर्भाव नहीं हो सकता है। दूसरी बात यह भी है कि तार्किकों ने जैसे भ्रमणादि का गमनादि में अन्तर्भाव किया है वैसे तो उत्क्षेपणादि का भी गमन में अन्तर्भाव कर सकते हैं, क्योंकि उत्क्षेपण भी ऊर्ध्वगमन ही है। अतः तार्किकों के अनुसार भ्रमणादि को गमन कहना तथा उत्क्षेपणादि को अलग कहना भी समुचित नहीं है। इस प्रकार मौनिश्रीकृष्णभट्ट के अनुसार तार्किकों के द्वारा क्रिया के पाँच प्रकार बताना भी युक्तियुक्त नहीं है।

4.4 मौनिश्रीकृष्णभट्ट ने तार्किकों के द्वारा प्रतिपादित सामान्य पदार्थ का खण्डन करते हुए वैयाकरणों की ओर से बहुत ही मौलिक विचार रखे हैं। मौनिश्रीकृष्णभट्ट का कहना है कि वैयाकरणों के अनुसार सामान्य नामक अतिरिक्त पदार्थ मानने की कोई आवश्यकता नहीं है, क्योंकि सामान्य को मानने में कोई प्रमाण नहीं है। जहाँ तक शक्यतावच्छेदक के रूप में भान की बात है इस सन्दर्भ में मौनिश्रीकृष्णभट्ट का कथन है कि शब्द की दो शक्तियाँ हैं जिसे वाक्यपदीयकार ने ग्राह्यत्व तथा ग्राहकत्व शक्ति के रूप में प्रतिपादित किया है। ग्राह्यत्व शक्ति के कारण शब्द ग्राह्य भी होता है। अतः शब्द का स्वरूप ही उसकी शक्यता का अवच्छेदक माना जा सकता है। इसलिए सामान्य या जाति पदार्थ मानने की कोई आवश्यकता नहीं है। सामान्य पदार्थ न मानने में वैयाकरण मत में कुछ दोष सम्भावित हैं जनकी आशङ्का स्वयं प्रस्तुत करते हुए मौनिश्रीकृष्णभट्ट ने इनका समाधान किया है।

4.5 मौनिश्रीकृष्णभट्ट ने तार्किकों के विशेष पदार्थ का खण्डन करते हुए यह प्रतिपादित किया है कि वैयाकरणों के अनुसार विशेष पदार्थ स्वीकार्य नहीं है, क्योंकि विशेष पदार्थ को स्वीकार करने में कोई प्रमाण नहीं है। जब विशेष पदार्थ ही सिद्ध नहीं होता है तो उसके द्वारा परमाणुओं की भेदकता कहाँ सिद्ध की जा सकती है। श्रीकृष्णभट्ट का कहना है कि जिस प्रकार तार्किक विशेषों की व्यावृत्ति स्वतः मानते हैं वैसे ही परमाणुओं की व्यावृत्ति स्वतः मानी जा सकती है।

4.6 समवाय के सन्दर्भ में मौनिश्रीकृष्णभट्ट का कहना है कि वैयाकरणों के मत में समवाय पदार्थान्तर नहीं है, क्योंकि समवाय की सिद्धि में प्रमाण नहीं है। गुण, क्रिया तथा सामान्य की विशिष्ट बुद्धि तो स्वरूप सम्बन्ध से भी सिद्ध हो

सकती है। यदि स्वरूप सम्बन्ध से निर्वाह हो सकता है तो अनुमान से समवाय मानने की कोई आवश्यकता नहीं है। अन्यथा समवायवद् भूतल में अभाव का भी वैशिष्ट्य में सम्बन्धान्तर मानना होगा।

4.7 अभाव के सन्दर्भ में ग्रन्थकार का मानना है कि अभाव अधिकरण के अतिरिक्त पृथक् पदार्थ नहीं है।

5. व्याकरणदर्शन के क्षेत्र में शब्दार्थतर्कामृतम् का स्थान एवं महत्त्व

व्याकरणदर्शन के क्षेत्र में मौनिश्रीकृष्णभट्ट का शब्दार्थतर्कामृतम् प्रमाण एवं प्रमेय विषय पर व्याकरणदर्शन के सिद्धान्त स्थापित करने वाला महत्त्वपूर्ण ग्रन्थ है। इसके पूर्ववर्ती व्याकरणदर्शन ग्रन्थों में प्रमाण एवं प्रमेयविषयक विचार बिखरे हुए हैं । मौनिश्रीकृष्णभट्ट ने प्रमाण एवं प्रमेय विषय को केन्द्रबिन्दु बनाकर अपनी इस कृति की रचना की है, जो सम्भवत: व्याकरणदर्शन के लिए अपूर्व कार्य है। इस कृति में आए हुए अनेक सिद्धान्त पूर्ववर्ती व्याकरणदर्शनग्रन्थों में पाए जाते हैं, किन्तु कुछ सिद्धान्त मौनिश्रीकृष्णभट्ट द्वारा पूर्वाचार्यों के संकेत से स्वयं संवर्धित किए गए प्रतीत होते हैं।

प्रकृत संस्करण के विषय में

जैसा कि पूर्व में उल्लेख किया जा चुका है कि इस ग्रन्थ का प्रथम संस्करण Journal Of G.N.Jha Kendriya Sanskrita Vidyapeetha, LXIII (1-4) January-December, 2007 के अंक में सन् 2009 में उसी के अङ्ग के रूप में प्रकाशित हुआ था। इस ग्रन्थ का स्वतन्त्र ग्रन्थ के रूप में प्रकाशन अनिवार्य था, जिसे प्रथम संस्करण में सामान्य संशोधन के साथ द्वितीय संस्करण के रूप में प्रकाशित किया जा रहा है। प्रथम संस्करण में तीन हस्तलेखों का उपयोग किया था, जिनका विवरण इस ग्रन्थ में संलग्न प्रथम संस्करण की भूमिका में दिया गया है। द्वितीय संस्करण में किसी नए हस्तलेख का उपयोग नहीं किया गया है, किन्तु मूलग्रन्थ में यत्र तत्र कुछ अपेक्षित प्रूफशोधन अवश्य किया गया है। ग्रन्थकार से सम्बद्ध जानकारी इस ग्रन्थ में संलग्न प्रथम संस्करण की भूमिका से प्राप्त की जा

सकती है। भविष्य में प्रकृत ग्रन्थ पर विस्तृत अध्ययन के साथ इसे इसका समीक्षात्मक संस्करण प्रकाशित करने की इच्छा है। एतदर्थ विद्वानों के मार्गदर्शन प्राप्त करने की कामना है।

कृतज्ञता ज्ञापन

राष्ट्रिय संस्कृत संस्थान के सम्माननीय कुलपति आचार्य राधावल्लभ त्रिपाठी जी के प्रति हार्दिक कृतज्ञता ज्ञापित करता हूँ, जिनकी सदिच्छा से इस ग्रन्थ का द्वितीय संस्करण के रूप में स्वतन्त्र प्रकाशन हो रहा है। आदरणीय प्रो. सुरेश चन्द्र पाण्डेय जी एवं सम्माननीय प्रो. राजेन्द्र मिश्र जी के प्रति अपनी कृतज्ञता व्यक्त करता हूँ, जिन्होंने परिसरीय प्रकाशन की विशेष समिति के सदस्य के रूप में इस ग्रन्थ के स्वतन्त्र प्रकाशन पर अपनी दृढ संस्तुति की।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालय के तत्कालीन कुलपति सम्माननीय प्रो. वी. कुटुम्बशास्त्री जी का हृदय से आभार ज्ञापित करता हूँ, जिनकी अनुमति से मुझे इस ग्रन्थ के हस्तलेखों की छायाप्रति सम्पूर्णानन्द संस्कृतविश्वविद्यालय, वाराणसी के सरस्वती भवन हस्तलेख संग्रहालय से अविलम्ब उपलब्ध हो सकी थी। सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी के पुस्तकालयाध्यक्ष, उप-पुस्तकालयाध्यक्ष तथा अन्य अधिकारियों एवं कर्मचारियों का आभारी हूँ, जिन्होंने हमें इस ग्रन्थ के हस्तलेखों की छाया प्रति उपलब्ध कराने में सहयोग प्रदान किया।

परिसर के पूर्व प्राचार्य प्रो. गोपराजू रामा जी के प्रति अपनी हार्दिक कृतज्ञता ज्ञापित करता हूँ, जिनके प्रोत्साहन से इस ग्रन्थ का सम्पादन किया गया था। परिसर के प्राचार्य प्रो. सुरेन्द्र झा जी के प्रति अपना हार्दिक आभार प्रकट करता हूँ, जिनके सत्-प्रोत्साहन से इस ग्रन्थ का प्रथम संस्करण परिसर की शोधपत्रिका में सन् 2009 प्रकाशित हुआ तथा द्वितीय संस्करण भी तैयार किया गया। मेरे मित्र डॉ. सच्चिदानन्द मिश्र, दर्शनविभाग, काशी हिन्दू विश्वविद्यालय, वाराणसी के प्रति अपनी कृतज्ञता व्यक्त करता हूँ, जिन्होंने इस ग्रन्थ के कुछ स्थलों पर दूरभाष से बहुमूल्य परामर्श के द्वारा मुझे अपना

सहयोग प्रदान किया। परिसर के सभी शैक्षणिक सदस्यों, संग्रहालय एवं पुस्तकालय के सदस्यों के प्रति कृतज्ञता ज्ञापित करता हूँ, जिनका समय समय पर सहयोग मुझे प्राप्त होता रहता है। श्री ब्रह्मानन्द मिश्र एवं श्री आशीष कुमार द्विवेदी साधुवाद के पात्र हैं, जिन्होंने इस ग्रन्थ के द्वितीय संस्करण की संगणकीय प्रतिकृति को अन्तिम रूप देने में सहयोग किया। अन्त में उन सभी के प्रति कृतज्ञता का अनुभव करता हूँ, जिनका इस ग्रन्थ के प्रकाशन में साक्षात् या परोक्ष सहयोग रहा है।

ललितकुमार त्रिपाठी
सम्पादक

❑❑

अनुक्रमणिका

❑❑

मौनिश्रीकृष्णभट्टविरचितं

शब्दार्थतर्कामृतम्

मौनिश्रीकृष्णभट्टविरचितं

शब्दार्थतर्कामृतम्

श्रीगणेशाय नमः

सजलजलदकान्तं वल्लरी[1]भिर्नितान्तं
प्रतितनुमुपगूढं वेदवेदान्तरूढम्।
कनकरुचिदुकूलं ब्रह्मनिर्वाणमूलं
विलसितवनमालं नौमि गोपालबालम्।।1।।

यन्माया*परिणामितज्जगदिदं[2] सर्वं समुज्जृम्भते[3]
ब्रह्माद्यैरपि यत्र शुद्धकरणग्रामैर्मुहुर्मूर्च्छितम्।
यद् गोपीभिरुपासितं मुनिहितं श्रुत्यर्थसम्पादितं
कालिन्दीपुलिनाश्रितं विलसितं ध्यायामि नीलं महः।।2।।

---

1. ख,ग,घ - *वल्लवी*
2. क - *परिणामि तज्जगदिदं*
3. ख,ग,घ - *समुज्जृम्भितं*

श्रीमन्मौनिकुलावतंस*जनित[4]प्रत्यक्षवाचस्पतिं
नत्वा स्वीयपितामहं बुधवरं गोवर्द्धनं भक्तितः।
मौनिश्रीरघुनाथपण्डिततनूजन्मा सतां तुष्टये
श्रीकृष्णस्तनुते मितेन वचसा शब्दार्थतर्कामृतम्।।3।[5]

1. मङ्गलविचारः

1.1 अभिमततर्कारम्भसमये सर्वे शिष्टा मङ्गलमाचरन्ति। तच्च विघ्नभिन्नत्वे सति विघ्नध्वंसप्रतिबन्धकाभावभिन्नत्वे सति प्रारिप्सितविघ्नध्वंसासाधारणं कारणम्[6]। विघ्नध्वंसे प्रतियोगिनो विघ्नस्यापि कार्यत्वानवच्छिन्नकार्यतानिरूपितकारणताश्रयत्व*रूपासाधारणत्वम्[7]। तत्रातिव्याप्तिवारणाय पूर्वसत्यन्तम्। विघ्नध्वंसे प्रतिबन्धकाभावस्यापि तुल्यत्वात् तत्रातिव्याप्तिवारणाय द्वितीयं सत्यन्तम्। वृष्टिविघ्नध्वंसासाधारणकारणे कारीरीयागेऽतिव्याप्तिवारणाय प्रारिप्सितेति।

1.2 ननु विघ्नध्वंसासाधारणकारणे विनायकस्तवपाठादाविदमतिव्याप्तं, न च तस्य तथात्वमप्रसिद्धमिति वाच्यं, "सर्वे विघ्नाः समं यान्ति गणेशस्तवपाठत" इति स्मृतेः, शिष्टानां तथाचाराच्च तस्य तथात्वसिद्धेरिति चेन्न, विनायक*स्तवपाठादेरपि[8] लक्ष्यत्वात्,

---

4. ख – *जनन*

5. क – *मौनिश्रीरघुनाथपण्डिततनूजन्मा सतां तुष्टये। श्रीकृष्णस्तनुते मितेन वचसा शब्दार्थतर्कामृतम्।।* अयं श्लोकः नोपलभ्यते

6. ख,ग,घ – *कारणत्वम्*

7. ख,ग,घ – *रूपासाधारणत्वात्*

8. क – *स्वस्य*

विनायकस्तवपाठस्य मङ्गलत्वस्वीकारे बाधकाभावात्, एककार्य*कारणता[9] भावकल्पनेन लाघवाच्च, "अथ शब्दानुशासनम्" "वृद्धिरादैच्" इत्यादौ अथशब्दवृद्धिशब्दयोर्मङ्गलार्थं पाठ इति वदद्भिः सूत्रकार-भाष्यकारैर्मङ्गलार्थक*शब्दपाठस्यापि[10] मङ्गलत्वबोधनाच्च[11]।

1.3 एतेन ननु[12] मङ्गलं न विघ्नध्वंसकारणं विनायकस्तव-पाठजन्यविघ्नध्वंसे व्यभिचारात्, विनायकस्तवस्य मङ्गलत्वेऽपि तदनुकूलकण्ठाभिघातरूपस्य तत्पाठस्य मङ्गलत्वाभावादिति चेन्न, मङ्गलस्य स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसम्बन्धेन मङ्गलविशिष्टविघ्न* ध्वंसत्वं[13] विजातीयविघ्नध्वंसत्वं वा कार्यतावच्छेदकम्। एवं विनायकस्तवपाठादेरुपदर्शितसम्बन्धेन, विनायकस्तवपाठादिविशिष्ट-विघ्नध्वंसत्वं विजातीयविघ्नध्वंसत्वं वा कार्यतावच्छेदकमित्यादि तार्किकोक्तमपास्तम्, अनेककार्यकारणभावकल्पने गौरवात्, *विशिष्टस्य कार्यतावच्छेदकत्वे सुतरां गौरवाच्च[14], विनायकस्तवपाठस्य मङ्गलत्व-स्वीकारे बाधकाभावाच्च, स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसम्बन्धेन विजातीयविघ्नध्वंसस्य कार्यतावच्छेदकत्वेन वा व्यभिचारव्यावृत्ति-सिद्धेरुभयोरुपादानस्य व्यर्थत्वाच्च, *विनायकस्तवपाठः मङ्गलं प्रारिप्सितविघ्नध्वंसासाधारणत्वात् तार्किकाभिप्रेतमङ्गलवदित्यनु-मानाच्च।[15]

---

9. ख, ग – *कारण*
10. क – शब्दस्यापि
11. क – *मङ्गलत्वबोधनात्*
12. क – *तु*
13. क – *ध्वंसत्व*
14. ख – *विशिष्टस्य*............ *गौरवाच्च* इति नोपलभ्यते
15. ख – *विनायकस्तवपाठः मङ्गलं* .... *इत्यनुमानाच्च* इति नोपलभ्यते

2. प्रमाणसामान्यनिरूपणम्

इह सकलजनेच्छाविषयमोक्षाभावप्रयोजकीभूताभावप्रतियोग्यात्मतत्त्वज्ञानस्य व्यावहारिकपदार्थतत्त्वज्ञानस्य च प्रमाणाधीनत्वात् प्रमाणं निरूप्यते। तानि च प्रत्यक्ष अनुमानोपमानशब्दार्थापत्त्यनुपलब्धिसम्भवैतिह्येत्यष्टौ। सम्भवैतिह्यरहितानि षडिति मीमांसकवेदान्तिनः। चत्वारीति तार्किकाः। प्रत्यक्षं शब्दश्चेति द्वयमिति शाब्दिकाः। अत्र यथोपनीतभानेन*अनुमानस्य[16] गतार्थता तथाऽग्रे वक्ष्यते।

3. प्रत्यक्षनिरूपणे प्रत्यक्षानुमानयोरेकवाक्यताविचारः

3.1 अत्र[17] अनुमिति*करणादीनां[18] साक्षात् परम्परासम्बन्धेन प्रत्यक्षप्रमितितत्करणोपजीवकत्वाद् उत्सर्गत उपजीव्यं निरूप्य*एव[19] उपजीवकनिरूपणादिच्छावशाद्वादौ प्रत्यक्षं तत्प्रमितिश्च निरूप्यते। अत्र प्रत्यक्षानुमानग्रन्थयोरेकवाक्यतां वदन्ति तार्किकाः। तत्र च "अर्थैक्यादेकं वाक्यं साकाङ्क्षञ्चेद् विभागे स्याद्" इति जैमिनि*सूत्रस्यार्थैक्याद्[20] इति पदं तात्पर्यविषयार्थकत्वेन व्याख्याय प्रकृते च प्रमाणनिरूपणं तात्पर्यविषय इति व्याख्यातम्।

3.2 अत्रेदं वक्तव्यं किं महातात्पर्यविषयैक्यं विवक्षितमुतावान्तरतात्पर्यविषयैक्यम्? नाद्यः, सर्वस्य मोक्षरूपैकविषयतात्पर्यार्थकत्वेन

---

16. ख - *अनुमान*

17. ख- तत्रा

18. ख - *करणादिना*

19. क - *एव* इति नोपलभ्यते

20. क,ग,घ - *सूत्रथैक्याद्*

एकवाक्यतापत्त्या[21] सूत्रवैयर्थ्यापत्तेः, उक्तरीत्या प्रकरणस्यापि[22] वाक्यत्वात् प्रकरणाद्[23] वाक्यं बलीय इत्येतत्प्रतिपादकश्रुतिलिङ्ग-वाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यप्रतिपादक बलाबलाधिकरण[24] विरोधापत्तेश्च[25]। नान्त्यः, प्रत्यक्षानुमानग्रन्थयोरप्यवान्तरतात्पर्यभेदेन भवदुक्तैकवाक्यतानापत्तेः। यदि प्रत्यक्षानुमानग्रन्थयोरप्यवान्तर-तात्पर्यभेदेऽपि प्रमाणनिरूपणं तात्पर्यविषयैक्यं ब्रूषे तर्हि "*स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि"[26]इति सदनप्रतिपादकस्य[27] "तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणामेध सुमनस्यमान" इति सादन-प्रतिपादकस्य च यागाङ्ग[28] निरूपणत्वेनैक्यात् प्रत्यक्षानुमानग्रन्थयोरि-वानयोरपि एकवाक्यतापत्तेः। न चेष्टापत्तिः, अर्थैक्यादित्यस्य भवदुक्त-व्यावर्त्यासंगतेः। 'यत् पठिष्यसि तव तच्छुभं भविष्यति' इत्यादीनामप्येक-वाक्यतापत्त्या ते इत्यादेशापत्तेः। न च पारिभाषिकम् "एकतिङन्तार्थमुख्य-

---

21. क - *एकवाक्यतापत्तौ*

22. क - *ज्ञानस्यापि,* ख - *प्रकरणस्यापि*

23. क - *ज्ञानाद्* , ख - *प्रकरणाद्*

24. क - *वचनाधिकरण*

25. क - विरोधापत्तेः

26. क - *तस्यानन्ते .....मुखैवं कल्पयामि*
    ख - *तस्यानन्ते....सुषेवं कल्पयामि*
    घ - *तस्यानन्ते ..... सुषैवं कल्पयामि*

27. क - *सदनप्रतिपादनस्य*
    ख,ग,घ - *सदनप्रतिपादकस्य*

28. क - *पाठाङ्ग*

विशेष्यकं वाक्यम्" इति तत्र स्वीकार्यमिति वाच्यम्, तेनैव निर्वाहे भवदुक्तार्थस्य[29] व्यर्थत्वात्।

3.3 किञ्चात्र "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेद्" इत्यादिवाक्यानां "समिधोपयजति"[30] इत्यादिवाक्यानां परस्परापेक्षिताङ्गाङ्गिभावबोधकतया यथैकवाक्यता तथा प्रकृते सम्भवेऽपि न सा पदैकवाक्यता, किन्तु वाक्यैकवाक्यता। न च तस्या इदं लक्षणं *मीमांसकनामस्मदर्थ एव सम्मतः। स्वातन्त्र्ये इच्छा चेद् यद्यत्सङ्गतिमत् तत्तदेकं वाक्यम् इत्येव वक्तुमुचितं[31] न तु सूत्रार्थस्य यत्किञ्चित् प्रतिपादनमिति दिक्।

3.4. अत्र च[32] *आनन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो ह्यर्थः सङ्गतिरिति सङ्गतिलक्षणव्याख्यावसरेऽभिधानस्य[33] आनन्तर्यमानन्तार्याभिधानम्[34] अर्द्धपिप्पल्यादिवत् समास इति व्याख्यातम्। तथा *"शिष्यबुद्धिगोचरा गुरोरिच्छा" इति[35] च व्याख्यातं तार्किकैः। तद्[36] उभयमप्यसत्। अर्द्धपिप्पलीत्यत्रानुशासनसत्त्वेन विशेष्यस्येति पूर्वनिपातेऽपि प्रकृते तदभावात्। यदि तु अगतिकगतिकं राजदन्तादित्वं प्रकल्प्य

---

29. क - *भवदुक्तस्य*

30. ख *समिधा* यजति

31. ख - *मीमांसकानामस्मदर्थ....... इत्येव वक्तुमुचितम्* इति नोपलभ्यते

32. क,ख,घ - *एव*

33. क- *आनन्तर्याभिधानप्रयोजकजिज्ञासाजनक ज्ञानविषयो ह्यर्थः सङ्गतिरिति सङ्गतिलक्षणव्याख्यावसरेऽभिधानस्य* इति नोपलभ्यते

34. ख,ग,घ - आनन्तर्यमानन्तर्याभिधानम्

35. क- *शिष्यबुद्धिगोचरान्तरोरिच्छेति*

36. क - तत्तु

कथञ्चित् समाधेयत्वेऽपि[37] राजदन्तादिवदिति वक्तुमुचितन्न तु अर्द्धपिप्पल्यादिवदिति। शिष्यबुद्धिगोचरेति व्याख्यानमनुचितमेव। भिन्नकर्तृके सन्प्रत्ययानुत्पत्तेः[38]। ननु रूढो[39] जिज्ञासाशब्द इति चेन्न, अनुशासनविरोधे रूढत्वानुपपत्तेः[40]।

4. प्रत्यक्षप्रमाणनिरूपणम्

4.1 तत्र प्रत्यक्षप्रमायाः करणं प्रत्यक्षम्[41]। अनुमानादावतिव्याप्ति-वारणाय प्रत्यक्षेति। सा[42] चेन्द्रियजन्यं यथार्थ*ज्ञानम्[43]। इन्द्रियजन्यत्वं (इन्द्रिय)रूपादौ[44] अस्ति अतो ज्ञानमिति। अनुमित्यादावतिव्याप्तिवारणाय इन्द्रियजन्येति। ननु इन्द्रियजन्यत्वाभावादीश्वरप्रत्यक्षेऽव्याप्तिरिति चेन्न, "इन्द्रियार्थ*सन्निकर्षोत्पन्नम्"[45] इतिसूत्रे ईश्वरप्रत्यक्षस्य अलक्ष्यत्वात्[46] तस्य लक्ष्यत्वे तु ज्ञानकरणकत्वाव्यभिचारिजातिशून्यज्ञानत्वं तत्।

4.2 ननु तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वरूपप्रमात्वेन शुक्ताविदं रजतमिति ज्ञानस्य प्रमात्वाभावेऽपि वह्निगुञ्जापुञ्जयोरिमौ गुञ्जा[47]

---

37. ख – *सुसाधत्वेऽपि*
38. क – *सन्प्रत्ययानुपत्तेः*
39. क – *कटो*
40. क – *कटत्वानुपपत्तेः*
41. ख – *प्रत्यक्षप्रमाणम्*
42. ख – *तच्च*
43. क – *ज्ञानञ्च*
44. क – *कपालादौ*
45. क – *सन्निकर्षापन्नम्*
46. क – *अलक्षत्वात्*
47. क – *गुञ्ज*

पुञ्जवह्नीति[48] विपरीतभ्रमे[49] वह्नित्वांशे तद्वद्[50] विशेष्यकत्वस्य गुञ्जांशे तत्[51] प्रकारकत्वस्य सत्त्वेन प्रमात्वापत्तिरिति चेन्न, तद्वन्निष्ठविशेष्यता-निरूपित*तन्निष्ठ[52] प्रकारकस्यैव प्रमात्वात्। प्रकारता विशेष्यता च स्वरूपसम्बन्धविशेषः। ननु तस्या ज्ञानस्वरूपत्वं विषयस्वरूपत्वं वा? नाद्यः, घटभूतलवृत्तिविषयतयोरैक्येन घटवद् भूतलमिति ज्ञानोत्तरं घटनिष्ठप्रकारतानिरूपितभूतलनिष्ठविशेष्यताशालिज्ञानवानहमिति अनुव्यवसायवद्[53] भूतलनिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यता-शालिज्ञानवानहमिति प्रतीत्यापत्तेर्घटपटाविति समूहालम्बनस्य भ्रमत्वा-पत्तेश्च। तज्ज्ञानस्यैक्येन तत्स्वरूपघटपटादिविषयताया अपि[54] ऐक्येन[55] घटत्वाभाववन्निष्ठविशेष्यतानिरूपित*घटत्व[56] निष्ठप्रकारताशालिज्ञानत्व-रूपभ्रमत्वस्य तत्र सत्त्वात्। न द्वितीयः, घटभूतलसंयोगाः घटवद् भूतलमिति समूहालम्बनविशिष्टबुद्ध्योरैक्येन विषयकृतवैलक्षण्याभावाद् विषयताकृतमेव वैलक्षण्यं वाच्यम्, तत्र[57] विषयता-विषयरूपत्वे तत्[58]स्वरूपाणां तासामपि वैलक्षण्याभावात् समूहालम्बनविशिष्ट-

---

48. क – *इति* इति नोपलभ्यते
49. क,ग,घ –... *भ्रमत्वे*
50. क,ग,घ– तद्
51. ग,घ – *तद्वत्*
52. ग – *तत्तन्निष्ठ*
53. क –*अनुव्यवसीयवद्*
54. क – *चापि*
55. क – *तत्रैक्येन*
56. क – *घट*
57. क – *तत्र च*
58. क – *यत्*

बुद्ध्योर्वैलक्षण्यानुपपत्ति*र्जागरूकैव[59]। न च समूहालम्बनाविषयस्य[60] घटप्रतियोगिकत्वभूतलानुयोगिकत्व*रूप[61] *सम्बन्ध-सम्बन्धस्यापि[62] विशिष्टबुद्धिविषयत्वान्न वैलक्षण्यानुपपत्तिरिति वाच्यम्, घटभूतल-संयोगप्रतियोगित्वानुयोगित्वानीति सम्बन्धसम्बन्धस्यापि[63] भान[64] सम्भवात्। न च समूहालम्बने संयोगत्वेन संयोगभानं[65], न च विशिष्ट-बुद्धाविति तयोर्वैलक्षण्यमिति वाच्यम्, घटवद् भूतलं संयोगश्चेति[66] विशिष्टबुद्धौ तत्सत्त्वेन वैलक्षण्यानुपपत्तेरिति[67] स्वरूपसम्बन्धरूपत्वं दुर्वचमिति पदार्थान्तरत्वमिति सिद्धान्तितम्।

4.3 अत्रेदं वक्तव्यं किमिदं प्रत्यक्षमुत शाब्दं घटवद् भूतलं संयोगश्चेति विशिष्ट[68] ज्ञानम् ? नाद्यः, सम्बन्धद्वयभानापत्तेः। *न चेष्टापत्तिः[69], अनुभवविरोधात्। नान्त्यः, मतुपैव सम्बन्धस्योक्तत्वेन संयोगश्चेत्यस्य वैयर्थ्यात्। न च मतुपा सम्बन्धसामान्यस्योक्तत्वेऽपि विशेषबोधार्थं तदिति वाच्यम्, पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति

---

59. क - *ज्ञानरूपैव*
60. क - *समूहालम्बनस्य*
61. क -*रूप* इति नोपलभ्यते
62. क - *सम्बन्धस्यापि*
63. क - *सम्बन्धस्यापि*
64. क - *ज्ञान*
65. क - *ज्ञानं*
66. क,ग,घ - *संयोगश्च*
67. क - *वैलक्षण्यानुपपत्तिरिति*
68. क - *विशेष्य*
69. क - *न चेष्टापत्तिः, अनुभवविरोधात्* इति पाठः नोपलभ्यते

व्युत्पत्त्या पदार्थैकदेशे मतुबर्थे[70] संयोगश्चेत्यस्यान्वयायोगात्, अनेकविशेष्यकत्वेनैतस्य समूहालम्बनत्वाच्च, चकारासङ्गतेश्च। तस्मात् घटवद्भूतलं संयोगश्चेत्यन्तं न विशिष्टज्ञानं *किन्तु रङ्गरजतयोरिमे रजते इत्यांशिकभ्रमत्ववदांशिकविशिष्टज्ञानं[71]। तथा च समूहालम्बनात् स्पष्टो भेदः। यदि तु तस्यापि विशिष्टबुद्धित्वमित्याग्रहः तथापि विशिष्टबुद्धौ क्वचित् संयोगत्वेन[72] संयोगभानं समूहालम्बने तु सर्वत्रैव। विशिष्टबुद्धौ सर्वत्र प्रतियोगित्वानुयोगित्वभानं[73] समूहालम्बने तु क्वचित्। यदि तु तत्रैव भेदाभावं ब्रूषे तर्हि समूहालम्बने प्रतियोगित्वानुयोगित्वमात्रम्। विशिष्टबुद्धौ तु घटीयं प्रतियोगित्वं भूतलनिष्ठमनुयोगित्वमिति भेदस्य विद्यमानत्वान्न समूहालम्बनविशिष्टबुद्ध्योर्विषयताया विषय[74]स्वरूपत्वेऽपि वैलक्षण्यानुपपत्तिरूपो दोषः।

4.4 एवं विषयतायाः ज्ञानरूपत्वेऽपि न पूर्वोक्तदोषद्वयम्। घटवद् भूतलमित्यत्र घटभूतलवृत्तिविषयतयोरैक्येऽपि घटनिष्ठप्रकारतानिरूपितभूतलनिष्ठविशेष्यताशालिज्ञानवानहम् इत्येवानुव्यवसायः, न तु विपरीतः, ज्ञाने वैजात्यस्वीकारात्। अन्यथा तव मतेऽपि विषयताया अतिरिक्तत्वेऽपि घट एव प्रकारता भूतल एव विशेष्यतेत्यत्र विनिगमकाभावेन[75] तव मतेऽपि विपरीतानुव्यवसायस्तुल्यः। घटवद्

---

70. क – *मतुबर्थ*

71. क,ग,घ – *किन्तु रङ्गरजतयोरिमे रजते इत्यांशिकभ्रमत्ववदांशिकविशिष्टज्ञानम्* इति नोपलभ्यते

72. क,ग,घ – *संयोगित्वेन*

73. ख – *प्रतियोगित्वानुयोगित्वं*

74. क – *विषयत्व*

75. क – *विनिगमकाभावेऽपि न*

भूतलमित्यत्र घटे एव प्रकारता भूतल एव विशेष्यताख्या विषयतेत्यत्र यत्त्वया नियामकं वाच्यं तदेवास्माभिर्घटनिष्ठप्रकारतानिरूपित-भूतलनिष्ठविशेष्यताशालिज्ञानवानहमिति अनुव्यवसाये[76] नियामकं वाच्यम्, तथा च समाधिरप्युभयोस्तुल्यः। तथा च विषयताया ज्ञानस्वरूपत्वे, न विपरीतानुव्यवसायापत्तिरूपो दोषः। तदभाववति तत्प्रकारकज्ञानरूप-भ्रमलक्षणे तद्वन्निष्ठविशेष्यतानिरूपित*तत्[77] प्रकारकज्ञानाभावविशिष्टेति च ज्ञानविशेषणान्न *समूहालम्बनस्य भ्रमत्वम्[78]।

4.5 नन्वेवं[79] रङ्गरजतयोरिमे[80] रजते इत्यांशिकभ्रमेऽव्याप्तिः, रजतांशे तद्वन्निष्ठविशेष्यतानिरूपित तन्निष्ठप्रकारताशालि*ज्ञानाभावादिति[81] चेन्न, तदवच्छेदेनेत्यस्यापि[82] तत्र[83] विविक्षितत्वात्। अन्यथा संयोगस्या-व्याप्यवृत्तित्वादिदं संयोगीति ज्ञानस्य भ्रमत्वापत्तेः। अथवा भ्रमे तदवच्छेदेन तद्वन्निष्ठविशेष्यतानिरूपिततत्प्रकारकज्ञानस्य प्रतिबन्धकत्वम्। तथा च समूहालम्बने तत्सत्त्वान्न भ्रमत्वम्, एवं च शाब्दिकमते विषयता*-ऽतिरिक्ता[84] न स्वीकर्त्तव्येति महल्लाघवम्।

---

76. ख,ग - *अनुव्यवसायनियामकं*
77. ख,ग,घ - *तत्तत्*
78. ख - *समूहालम्बनभ्रमत्वम्*
79. क - ननु
80. क - *अगररजयो उभे*
81. क - *ज्ञानाभादिति*
82. क,ख,ग,घ- *तदवच्छेदेनेत्यपि*
83. क - *तत्र* इति नोपलभ्यते
84. क - *अतिरिक्ता* इति नोपलभ्यते

4.6 तच्च प्रत्यक्षं द्विविधं नित्यमनित्यं च। नित्यं भागवतम्। नित्यत्वं प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वम्। सत्यन्तनिवेशान्न ध्वंसेऽतिव्याप्तिः। प्रागभावेऽतिव्याप्तिवारणाय विशेष्यदलम् अनित्यमन्यत्। केचित्तु प्रागभावाप्रतियोगित्वं ध्वंसाप्रतियोगित्वं वेत्याहुः[85]।

4.7 अत्र **शाब्दिकाः** किमिदं लक्षणद्वयम् उतैकम् ? नाद्यः, प्रागभावस्य प्रागभावाप्रतियोगित्वेनाद्यस्य तत्राव्याप्त्या, ध्वंसस्य ध्वंसाप्रतियोगित्वेन द्वितीयस्य तत्राव्याप्त्या लक्षणद्वयस्यापि दुष्टत्वात्। ननु तयोर्नित्यत्वमिष्टमिति चेन्न, नित्यलक्षणस्यापि तत्राव्याप्तेः। नान्त्यः, वाकारासङ्गतेः, प्रागभावध्वंसयोरनित्यत्वानापत्तेश्च। एवं च ध्वंसप्राग-भावयोर्नित्यानित्यबहिर्भावापत्तेः।

4.8 तच्चानित्यं द्विविधं निर्विकल्पकं सविकल्पकं चेति। तत्र निर्विकल्पकं वैशिष्ट्यनिष्ठसांसर्गिकविषयताशून्यं प्रकारतासामान्यशून्यं विशेष्यतासामान्यशून्यं वा। नन्वयं घट इति ज्ञानोत्तरं घटत्वेनेमं जानामीत्यनुव्यवसायः। तत्र वैशिष्ट्यस्य तृतीयार्थत्वे घटत्वविषयक-ज्ञानवानिति प्रकारत्वस्य तृतीयार्थत्वे घटत्वप्रकारकज्ञानवानित्याकारः। तथा च तादृशानुव्यवसायबलात् सविकल्पकस्य प्रत्यक्षसिद्धत्वेऽपि निर्विकल्पकस्यानुव्यवसायगम्यत्वाभावान्न प्रत्यक्षप्रमाणम्, नाप्यनुमानम्, अप्रयोजकत्वादिति चेन्न, अयं[86] घट इत्याकारकं[87] जन्यघटत्वप्रत्यक्षं[88] जन्यघटत्वज्ञानपूर्वकं जन्यघटत्वविशिष्टज्ञानत्वात् यद्यद् विशिष्टज्ञानं भवति तत्तद् विशेष्यज्ञानपूर्वकं भवति, दण्डी पुरुष इतिवद् इत्यनुमानसम्भवात्।

---

85. क – *चेत्याहुः*

86. क – *अयं* इति नोपलभ्यते

87. क – *इत्याकारक*

88. क – *प्रत्यक्ष*

*न चानुकूलतर्काभावादप्रयोजकम्, जन्यतद्विशिष्टज्ञानत्वावच्छिन्नं प्रति जन्यतद्विशेषणज्ञानत्वेन हेतुत्वमिति कार्यकारणभावानुकूलतर्कसम्भवात्[89]।

4.9 **शाब्दिकास्तु** मास्तु निर्विकल्पकं तत्सत्त्वे मानाभावात्, फलाभावात्, कल्पनागौरवादननुभवाच्च। न चानुमानं मानम्, अनुकूल-तर्काभावेनानुमानस्याप्रयोजकत्वात्। उक्ततर्कस्तु दण्डीतिदृष्टान्तानुरोधेन समवेतविशेषणान्यविशिष्टबुद्धिं प्रत्येव विशेषणज्ञानस्य कारणत्वं, धर्मिकल्पनातो व्युत्पत्तिसङ्कोचस्य न्याय्यत्वात्। मीमांसकादिभिरपि तथा स्वीकृतत्वाच्च।

5. पदार्थनिरूपणे द्रव्यनिरूपणम्

5.1 प्रमाणस्य प्रमेयसापेक्षत्वात् पदार्था निरूप्यन्ते। ते च द्रव्यगुण-कर्मसामान्यविशेषसमवायाभावाः सप्त। तत्र गुणाश्रयो द्रव्यं द्रव्यत्वजातिमद् वा। जातिसिद्धिस्तु समवायिकारणतावच्छेदकतया संयोगस्य विभागस्य वा कारणतावच्छेदकतया इति तार्किकाः।

5.2 **शाब्दिकास्तु** सुखजनककार्यं प्रति धर्मस्य दुःखजनककार्यं प्रति अधर्मस्य कारणत्वावश्यकतया यथा कार्यसामान्यं प्रति अदृष्टस्य कारणत्वे मानाभावात् कार्यसामान्यजनकतावच्छेदकतया नादृष्टत्वं जातिरिति तार्किकैः सिद्धान्तितं तथा मयापि। गन्धादिकार्यं प्रति पृथिव्यादीनां कारणत्वावश्यकतया कार्यसामान्यं प्रति द्रव्यत्वेन कारणत्वे मानाभावाद् द्रव्यत्वजातेरपि असिद्ध्यापत्तेः[90], न चेष्टापत्तिः, अपसिद्धान्तात्। गुणाश्रयत्वमपि द्रव्यलक्षणमेकम्। एवमपि रूपं रसात् पृथगित्यादौ गुणेऽपि गुणाश्रयत्वादतिव्याप्तम्। न चैकार्थसमवायप्रत्यासत्त्या द्रव्य एव

---

89. क - *न चानुकूल...... तर्कसम्भवात्* इति नोपलभ्यते

90. ख - *असिद्ध्यापत्तिः*

सङ्ख्यान्वयो, न रूपे इति वाच्यम्, एवमपि[91] एकं रूपमित्यादावतिव्याप्तिः। पृथिव्यप्तेजो वाय्वाकाशकालदिगात्ममनांसीति परिगणनमपि न, मानाभावात्। न च द्रव्यं द्रव्यमिति व्यवहारो मानं घृतजतुप्रभृतिषु[92] तदभावात्। किञ्च[93] चं पठेत्यादौ चकारस्याद्रव्यत्वाच् "चादयोऽसत्त्वे" इति निपातत्वेऽव्ययत्वात् सुब्लुकि[94] प्रयोगो न स्यात्। न च तत्र पारिभाषिकं द्रव्यत्वमिति चेत्तर्हि तदेवास्तु। मास्तु भवत्परिभाषितं, प्रयोजनाभावात्। न च द्रव्ययोरेव संयोग इति प्रयोजनं, गुणाश्रययो[95] रेवेत्यनेनापि निर्वाहे तस्य व्यर्थत्वात्। तस्मात्

> वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते।
> द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितम्।।

इति। भाष्योक्तं "लिङ्गसङ्ख्यान्वितं द्रव्यम्" इति वा द्रव्यलक्षणमित्येव तत्त्वम्। तच्च धात्वर्थाव्ययार्थव्यतिरिक्तसप्तपदार्थसाधारणम्।

5.3 तथा च द्रव्याद्रव्यभेदेन द्विविधः पदार्थ इति शाब्दिकसिद्धान्तः। अन्येषां तार्किकोक्तविभाजकोपाधीनां घटादिविभाजकोपाधिवदनावश्यकत्वात्। न च न्यूनाधिकव्यवच्छेदार्थकत्वेन[96] तेषां सार्थक्यं, विशेषो न पदार्थान्तरं, विषयता पदार्थान्तरं, शक्तिः पदार्थान्तरम-

---

91. क – *एवमपि* इति नोपलभ्यते

92. क – *घृततेजःप्रभृतिषु*

93. क – *किञ्च* इति नोपलभ्यते

94. क – *सुपि लुकि*

95. क – *गुणाशूयायाया*

96. क – *न्यूनाधिकव्यवच्छेदकत्वेन*

खण्डोपाधिः पदार्थान्तरमिति वदद्भिर्न्यूनाधिकत्वस्यापि स्वीकारात्। न चाखण्डोपाधेः सामान्यत्वम्, एकवृत्तित्वेन समवेतत्वाभावेन च नित्यानेकसमवेतत्वाभावात्। एवञ्च अभाव[97] प्रतियोगित्वेन चादयोऽसत्त्व इत्यत्र सप्तानामपि ग्रहणम्। पाक इत्यादौ घञर्थस्यापि द्रव्यत्वम्।

5.4 तार्किकास्तु दिक्कालौ नेश्वरादतिरिच्येते आकाशस्य च नित्यत्वमाहुः। तन्न युक्तिमत्, दिक्कालयोरचेतनत्वेन चेतनेश्वर-तादात्म्याभावात्। अन्यथा सर्वस्यैवेश्वरतादात्म्यापत्तेः। आकाश[98] नित्यत्वे च न मानम्। "एतस्मादात्मन आकाशः सम्भूत" इति श्रुत्या[99] तस्यानित्यत्व-बोधनाच्च। आकाशोऽनित्यः कृतकत्वाद् घटवदित्यनुमानाच्च। न च सम्भूत इत्यस्याविर्भूत इत्यर्थकतया कृतकत्वमेवासिद्धमिति वाच्यम्, पृथिव्यादीनां शब्दस्य च नित्यतापत्तेः[100]।

5.5 ननूत्पन्नो गकारो विनष्टो गकार इति प्रतीत्या तस्यानित्यत्वं, तन्न, आकाशवदाविर्भावतिरोभावार्थकत्वेन प्रतीत्युपपत्तेः। अनन्त-प्रागभावध्वंसकल्पनाभावेन लाघवाच्च।

5.6 किञ्च सगुणकपालान्निर्गुणघटोत्पत्तिरित्यपि विरुद्धं गुणाश्रयत्वाभावेन द्रव्यत्वाभावप्रसङ्गात्। न च गुणसमानाधिकरण-द्रव्यत्व*व्याप्य[101] जातिमत्त्वमिति[102] निष्कर्षान्न दोष इति वाच्यम्, एवं द्रव्यत्वासिद्धावपि तथानुभवाभावात्। न च गुणनिष्ठकार्यता-

---

97. क - *भाव*

98. क - *आकाशे*

99. क - *प्रेत्य*

100. ख - *अनित्यतापत्तेः*

101. क - *व्याप्य* इति नोपलभ्यते

102. क - *इति* इति नोपलभ्यते

निरूपितानन्यथासिद्धनियतपूर्ववृत्तित्वरूप*कारणत्वान्यथा[103]ऽनुपपत्त्या अनुभवविरुद्धमपि कल्प्यते, बलवती ह्यन्यथानुपपत्तिरिति वाच्यम्, गुणविशिष्टकपालस्य गुणविशिष्टघटं प्रति कारणत्वमयुत-सिद्धस्थलेऽनुभवसिद्धं कल्प्यते, बाधकाभावादनुभवसिद्ध-निर्गुणत्वकल्पनापेक्षयाऽयुतसिद्धानां विशिष्टकारणत्वकल्पनस्यै-वोचितत्वात्।

5.7 अथवा यद्गुणपृथक्त्वेन द्रव्यस्य नोपलम्भस्तद्गुणस्य द्रव्यरूपत्वं द्रव्यव्यतिरेकेण गुणस्य, गुणव्यतिरेकेण द्रव्यस्यानुपलम्भात्। गुणस्य द्रव्यातिरिक्तत्वे मानाभावः[104]। पाकेन श्यामपरमाणूनां विभागः रक्तपरमाणूनां संयोग इत्येव कल्प्यते। तव मते यथा पीलुपाकः पीठर[105] पाक इति कल्पनम्। त्वया रूपमात्रं कल्प्यते मया तु परमाणव एव तादृशाः कल्प्यन्त इति विशेषः। एवञ्च गुणं प्रति द्रव्यस्याकारणत्वान्निर्गुण-कल्पना न कर्तव्येति लाघवम्।

6. आत्मनिरूपणम्

6.1 आत्मत्वजातिमानात्मा। सुखसमवायिकारणतावच्छेदकतया सिद्धस्यात्मत्वस्येश्वरेऽपि सत्त्वम्। न च नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भावनियमात् सुखाद्यापत्तिः। अप्रयोजकत्वात्, अदृष्टादि-सहकारिकारणभावाच्च। स च जीवेश्वरभेदेन द्विविधः। जीवास्त्वनन्ताः। ईश्वर एक एव। द्विविधोऽपि नित्यो विभुश्च। ईश्वरसत्त्वे मानं तु 'क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वाद् घटवद्' इत्यनुमानमित्याहु-स्तार्किकाः।

---

103. ख - *कारणान्यथा*

104. ख - *मानाभावे*

105. ख - *पिठर*

6.2 अत्र केचित् आत्मत्वं न जातिरेकव्यक्तिवृत्तित्वात्। न चोपाधिभेदवद् भिन्नत्वं, तादृशस्य जात्यनियामकत्वाद्। अन्यथा-काशत्वमपि जातिः स्यात्। तत्रापि[106] घटाकाशमठाकाश*जला[107] काशेत्यादिभेदस्य सत्त्वात्। न चेष्टापत्तिरपसिद्धान्तात्। एकत्वे मानन्तु एकमेवाद्वितीयं ब्रह्मेति श्रुतिः। ननु कथं तर्हि जीवेश्वरभेदाः प्रतीयन्त इति चेत्, मायाविद्याद्युपाधिभेदाद्। भेदस्य पारमार्थिकत्वे तु तत्त्वमसीत्यादि-श्रुतिरभेदार्थिकेति विरुध्येत। न च तस्य त्वमिति षष्ठी[108] समासेन भेद एव प्रतीयत इति चेत्, अहं ब्रह्मास्मीति विद्वदनुभवविरोधात्। ननु तत्र "सुपां सुलुग्०" इति[109] षष्ठ्या लुकि[110] कृते भेदानुभव एवेति चेन्न, सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात्।

6.3 ननु बृहदारण्यके "प्रज्ञानघन एवैतेभ्यो भूतेभ्यः *समुत्थाय तान्येवानुविश्यति" इति[111] जीवाभिप्रायेण भूतोपाधिविनाशानुविनाश-प्रतिपादनेनाविनाशी वारेऽयमात्मेति कूटस्थाभिप्रायेण विनाशप्रतिपादनेन च जीवपरमात्मनोर्विनाशित्वाविनाशित्वात् कथमभेद इति चेन्न, नेदमभेदसामानाधिरण्यं किन्तु *बाधायां यः स्थाणुरेष पुमानिति पुरुषत्व-बोधेन स्थाणुत्वबुद्धिर्निवर्तते। एवमहं ब्रह्मास्मीति कूटस्थब्रह्मत्वरूप-बोधेनाध्यस्ताहमर्थत्वरूपं निवर्तते।

---

106. क - अस्पष्टः पाठः

107. क - *जना*

108. क - *षष्ठ्या*

109. क - *अलुगिति*

110. क - *अलुक्*

111. क - *समुत्पाद्य तान्येवानुविनश्यन्तीति*

योऽयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव।
ब्रह्मास्मीति धियाशेषा ह्यहं बुद्धिर्निवर्तते।।[112]

इति नैष्कर्म्यसिद्धिवचनात्। अत्र[113] किमुपाधिकोऽयं जीवः किमुपाधिक ईश्वर इति चेच्छृणु जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव[114] भवतीति श्रुतिसिद्धौ मूलप्रकृतेर्द्वौ[115] भेदौ। रजस्तमोऽनभिभूतशुद्धसत्त्वप्रधाना माया, तदभिभूतमलिनसत्त्वप्रधाना त्वविद्येति तयोर्भेदं परिकल्प्य मायाप्रतिबिम्ब ईश्वरः, अविद्याप्रतिबिम्बो जीवः। यद्वा कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इति श्रुत्याऽविद्याप्रतिबिम्ब ईश्वरः अन्तःकरण[116] चित्प्रतिबिम्बो जीवः। एवं च जीवेश्वरयोरपि प्रतिबिम्बत्वं शुद्धचितो बिम्बत्वम्।

6.4. अन्ये तु

विभेदजनकेऽज्ञाने नाशमात्यन्तिके गते।[117]
आत्मनो ब्रह्मणो भेदमसन्तं[118] कः करिष्यति।।

इति स्मृत्या एकस्यैवाज्ञानस्य जीवेश्वरोपाधिदर्शनाद् बिम्बप्रतिबिम्ब[119] भावेन जीवेश्वरयोर्विभाग इत्याहुः। एवं जीव ईशो[120] विशुद्धा

112. क – *बाधोदयंस्तात्त्वने च पुमानिति पुरुषत्वबोधेन पुरुषत्वबुद्धिर्निवर्तते। सोऽयं स्थाणुः पुमानेव पुंधिया स्थाणुधीरिव*
113. ख – *तत्र*
114. क – *मुख्यमेव*
115. क – *मूलप्रकृतित्वा*
116. क – *अन्तःकरणे*
117. क – *इति*
118. क – *असंमतः*
119. क – *बिम्बप्रतिभावेन*
120. ख – *जीव ईश*

चिदिति चित्त्रैविध्यम्। अन्ये तूपहित[121] प्रतिबिम्बादर्शनाद् घटाकाशवदन्तःकरणावच्छिन्नं[122] चैतन्यं जीवः। तदनवच्छिन्न[123] ईश्वर इत्याहुः। परे तु न प्रतिबिम्बो नाप्यवच्छेदो जीवः, किन्तु कौन्तेयराधेयवदविकृतस्यैव ब्रह्मणोऽविद्यया जीवभावः व्याध*कुल[124] संवर्द्धितराजकुमारदृष्टान्तेन ब्रह्मैव स्वाविद्यया संसरति[125] स्वविद्यया मुच्यत इति बृहदारण्यके भाष्ये प्रतिपादनाद् राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्तते।[126] तथैवमात्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यत इति वार्तिकोक्तेश्च[127]।

6.5 अथायं जीव एक उतानेकः? अत्र केचित् एको जीवस्तेन[128] चैकमेव शरीरं सजीवम् अन्यानि स्वप्नदृष्ट*शरीराणीव निर्जीवानि[129] तस्य स्वप्नदर्शनवद्यावदविद्यं सर्वो व्यवहारः। एवं च बद्धमुक्तव्यवस्थापि नास्ति। शुकमुक्त्यादिकन्तु स्वाप्न[130] पुरुषान्तरमुक्त्यादिकमिव कल्पितम्। अत्र सम्भावितसकलपङ्कापङ्क*प्रक्षालनं[131] स्वप्नदृष्टान्तसलिलधारयैव कर्तव्यमिति "कर्मवत् कर्मणा तुल्यक्रिय" इति सूत्रे

---

121. ख - *तु रूपानुपहित*
122. क - *करणावच्छिन्न*
123. क - *तदनवच्छिन्नम्*
124. क - *कूल*
125. क - *संसारेति*
126. क - *यथैवम्*
127. क - *वार्तिककारोक्तेश्च*
128. क - *जीवस्तु*
129. क - *शरीरेणावनिर्जीवानि*
130. क - *स्वप्न*
131. क - *क्षालनं*

"आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना" इत्यत्रैकत्वे आत्मनः कर्तृकर्मानुपपत्तिमाशङ्क्य औपाधिकभेदेन कर्तृकर्मत्वप्रतिपादक-भाष्येणौपाधिक एव भेदो, न तात्त्विक इति सूचितम्। एतेनोपधेयसङ्करेऽपि उपाधेरसङ्कर इति न्यायेनात्मानमात्मनेत्यादौ कर्तृत्वकर्म्मत्व[132] प्रतिपादकस्तार्किकग्रन्थोऽपास्तः। एकसञ्ज्ञाधिकारेणैकस्य सञ्ज्ञा-द्वयाभावात्, जीवात्मनां तात्त्विकभेदप्रतिपादनं विभुत्वप्रतिपादनं चायुक्तमेव[133] पूर्वोक्तश्रुतिस्मृतिविरोधात्। विभुत्वे प्रमाणाभावात्, "अङ्गुष्ठमात्रं पुरुषं *विचकर्ष यमो बलाद्[134]" इत्यादिश्रुतिविरोधाच्च। न च मध्यमपरिमाणत्वेऽनित्यत्वं, मानाभावात् । आत्मनो विभुत्वे आत्म-प्रतियोगिकमनोऽनुयोगिकसम्बन्धस्य सत्त्वेन सर्वदा ज्ञानप्रसङ्गाच्च। यद्वाऽणुपरिमाण एव जीवात्मा, उपाधेरन्तःकरणस्याणुत्वेन उपधेयस्यापि[135] अणुत्वाभ्युपगमात्। न च सर्वदेहचैतन्यानुपपत्तिः, यथैकदेशस्थितो दीपः सर्ववेश्माभिज्वलयति तथैकदेशे हृद्देशे स्थितोऽपि सर्वशरीरं चेतनं करोति इत्यभ्युपगमात्।

6.6 किञ्चात्मनः सुखदुःखादिगुणवत्त्वम् अयुक्तम्[136] एव। कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्भीर्ह्रीरित्येतत् सर्वं मन एवेत्यादिश्रुतिविरोधात्। तेषामात्मगुणत्वेन भ्रमबीजं तु[137] कुसुमसान्निध्यात् स्फटिकलौहित्यभाने स्फटिको लोहित इति भ्रमवदन्तःकरणसान्निध्यम्।

---

132. क - *कर्तृकर्म*

133. क - *चासक्तमेव*

134. क - *विचकर्षयत् सावनात्*

135. क - *उपाधेयस्यापि*

136. क - *असक्तम्*

137. क,ख,ग,घ - *तु यथा*

6.7 अत्र[138] आत्मविषये विप्रतिपत्तयः[139]। तत्रात्मा[140] ज्ञानस्वरूपः प्रतिक्षणविनाशीति सौगताः[141]। देह एवात्मा स च स्थिरोऽपि अनुक्षण[142] परिणामी जायते नश्यति चेति[143] प्रत्यक्षसिद्धमेवैतदिति लोकायतिकाः[144]। देहातिरिक्तो देहेन सहैव जायते नश्यति चेत्यन्ये। सर्गाद्यकाल[145] एवाकाश-वज्जायते देहभेदेऽप्यनुवर्तमान एवाकल्पस्थायी नश्यति प्रलये इत्यपरे। नित्य एव आत्मा जायते नश्यति चेति तार्किकाः। अपूर्वदेहेन्द्रियादि-सम्बन्धो[146] जन्म। एवं मरणमपि[147] पूर्वदेहेन्द्रियादिविच्छेदः। इदञ्चोभयं[148] धर्माधर्मनिमित्तत्वात् तदाधारस्य नित्यस्यैव[149] मुख्यम्। अनित्यस्य तु कृतहान्यकृताभ्यागमप्रसङ्गेन[150] धर्माधर्माधारत्वानुपपत्तेर्न जन्ममरणे[151]

---

138. क - *अत्र* इति नोपलभ्यते

139. क - *प्रतिपत्तयः*

140. क - *तत्रात्म*

141. क - *सौगतः*

142. क - *अनुलक्षण*

143. क - *वेति*

144. क - *लौकायतिकाः*

145. क - *सर्गाद्यकरण*

146. ख,ग,घ - *सम्बन्धो* इत्यपि लभ्यते

147. क - *शरणमपि*

148. क - *इदञ्चोभय*

149. क - *नित्यतयैव*

150. क - *प्रसङ्गेन* इति नोपलभ्यते

151. क - *मरणे* इति नोपलभ्यते

मुख्ये इति वदन्ति। नित्यस्याप्यात्मनः[152] कर्णशष्कुलीजन्मना आकाशस्येव देहजन्मना जन्म, तन्नाशाच्च मरणम्। तदुभयमौपाधिकम् अमुख्यम्[153] एवेत्यन्ये।

इत्यात्मनिरूपणम्।

7. मनोनिरूपणम्

7.1 मनस्त्वजातिमन्मनः। तच्चातिरिक्तं द्रव्यमित्याहुस्तार्किकाः। **शाब्दिकास्तु** मनो नातिरिक्तं द्रव्यं मानाभावात्, किन्तु पृथव्यादीनां सात्त्विकांशैरुत्पन्नमिन्द्रियं यथा बाह्येन्द्रियाणि पाञ्चभौतिकानि तथेदमपि। एतावान् परं विशेषः तानि प्रत्येकं पृथिव्याद्यंशैरिदन्तु सर्वैर्यथा चित्ररूपम्। ननु तत्पृथगेवेति चेन्न, तस्य दूषयिष्यमाणत्वात्।

7.2 किञ्च द्रव्यप्रत्यक्षं संयोगेन गुणप्रत्यक्षं संयुक्तसमवायेनेति तार्किकाः। अत्र **शाब्दिकाः** किं द्रव्यगुणयोः स्वार्थद्रव्यलिङ्ग-सङ्ख्याकारकाणां क्रमिकशाब्दवत् गुणद्रव्ययोः क्रमिकप्रत्यक्षमुत युगपत् ? नाद्यः, अननुभवात्, भवन्मतेन गुणस्य[154] व्याप्यवृत्तित्वनियमेन गुणं विना द्रव्यप्रत्यक्षासम्भवाच्च। नान्त्यः, रूपविशिष्टद्रव्येणैव संयोगस्वीकारेण संयुक्तसमवायसन्निकर्षस्य व्यर्थत्वात्। न च द्रव्ययोरेव संयोग इति नियमान्न संयोगेन गुणप्रत्यक्ष इति वाच्यम्, गुणादि[155] विशिष्टद्रव्ययोरिति तदर्थत्वाद्[156] गुणरहितद्रव्येण संयोगाभावाच्च।

---

152. क – *नित्यस्यात्मनः*

153. क – *मुख्यम्*

154. ख,ग,घ – *आत्मगुणस्य*

155. क – *आदि* इति नोपलभ्यते

156. ख – *तदर्थात्*

7.3 किञ्च तार्किकैः सुवर्णस्य तैजसत्वं सिद्धान्तितम्। अनुमानेन सुवर्णं तैजसमत्यन्तानलसंयोगे सति अनुच्छिद्यमान[157] द्रवत्वात्, यन्नैवं तन्नैवं यथा घृतादिः। उष्णस्पर्शस्तु पार्थिवांशै[158] रभिभूतत्वान्नोपलभ्यते। नन्वन्धकारे सुवर्णस्य[159] साक्षात्कारापत्तिः सुवर्णभिन्नं[160] यत्तेजस्तद्भिन्न-द्रव्यचाक्षुषत्वावच्छिन्नं प्रति आलोकसंयोगस्य हेतुत्वात्। हीरकादीनां[161] पार्थिवत्वमेव। पार्थिवत्वलौहलेख्यत्वयोस्तत्र व्यभिचार[162] दानेन तस्य[163] पार्थिवत्वस्य स्पष्टत्वात्।

7.4 शाब्दिकास्तु सुवर्णं पार्थिवं[164] हीरकस्तैजस इत्याहुः। तथाहि सुवर्णं पार्थिवं पीतरूपाश्रयत्वात्, कठिनस्पर्शवत्त्वात् गुरुत्ववत्वाच्च[165] हरिद्रावत्। नैमित्तिकद्रवत्वात् घृतवद् वा। *गन्धस्तु अभिभूतत्वान्नोप-लभ्यते[166]। भवन्मते उष्णस्पर्शवत् पाषाणभस्मनीव तद्भस्मनि गन्धोपलब्धि[167]र्भवत्येव। यद् द्रव्यं यद् द्रव्यध्वंसजन्यं तत्तदुपादानोपादेय-

---

157. क – *अत्वच्छिद्यमान*

158. क – *अंशै* इति नोपलभ्यते

159. क – *सुवर्ण*

160. क – *भिन्न*

161. क – *हिरकादीनां*

162. क – *व्यभिचारा*

163. क – *तस्य* इति नोपलभ्यते

164. क – *हिरकस्*

165. क – *गुरुत्वाच्च*

166. ख – *गन्धस्तु अभिभूतत्वान्नोपलभ्यते* इति नोपलभ्यते

167. क – *उपलब्धि* इति नोपलभ्यते

मिति[168] व्याप्तेः। भवन्मते उष्णस्पर्शस्तु कदापि[169] नोपलभ्यते। एवं नैमित्तिक*द्रवत्ववत्त्वं[170] पृथिव्यामेव *सुवर्णस्य तैजसत्वसाधकस्यात्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वादिति हेतुसमुद्रव्यभिचरितत्वेनासद्धेतुत्वात्। रूपवत्वे सति अनुष्णाशीतस्पर्शवत्त्वाद् घटवदितरा[171] हिरकास्तैजसाः[172] कठिनत्वे सत्यलौहलेख्यत्वात्, यन्नैवं तन्नैवं यथा पृथिवी। यद्वा[173] शुक्लभास्वररूपवत्त्वात् यथा आदित्यादिः।

7.5 ननु तेजसि कठिनत्वम्[174] अप्रसिद्धं तव मते तेजस्यपि नैमित्तिकद्रवत्वस्याप्रसिद्धत्वेनोभयोस्तुल्यत्वात्। यथा तव मते सुवर्ण*रूपे[175] तेजसि नैमित्तिकद्रवत्वं तथा मन्मते हीरक[176] रूपतेजसि कठिनत्वं प्रसिद्धम्[177] इत्युभयोस्तुल्यत्वेन सुवर्णे तेजस्त्वं हीरके नेत्यत्र मानाभावः। हीरके[178]ऽन्वयदृष्टान्तसत्त्वेन सुवर्णे केवलव्यतिरेक्य-नुमानापेक्षया हीरके[179]

---

168. क – *तु द्वयापादानोपादेयम्*

169. क – *कदापि* इति नोपलभ्यते

170. क – *द्रवत्ववत्त्वं*

171. ख – *सुवर्णस्य तैजसत्वसाधकस्यात्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रव्यत्वात् इति हेतुसमुद्रव्यभिचरितत्वेनासद्धेतुत्वात् । रूपत्वे सति अनुष्णाशीतस्पर्शवत्वात् घटवदितरा* इति पाठः

172. ख – *हिरकस्तैजसः*

173. क – *यदा*

174. क – *कारणत्वम्*

175. क – *रूप*

176. क – *हिरक*

177. ख – *प्रसिद्धम्* इति नोपलभ्यते

178. क – *हिरके*

179. क – *हिरके*

तैजसत्वानुमानस्य प्राबल्याच्च।

7.5 *दिक्कालयोः पृथग् द्रव्यत्वमिति तार्किकाः। शिरोमणीये[180] उभयोरीश्वररूपत्वमुक्तम्। **शाब्दिकास्तु** दिक्कालौ नातिरिक्तं द्रव्यम्। दिक्कालावस्थिताङ्कराशिविशेषस्यैव दिक्त्वम्। अखण्डकालस्य व्यवहारानाधायकत्वादभाव एव। एवञ्चाखण्डकालभावे उपाधिवशात् तस्य खण्डकालत्वमिति कल्पनाप्यसाध्वी। यदुपाधिवशात् खण्डकालस्ते उपाधय एव सन्तु खण्डकालाः। तथा च सूर्यगतिविशेषः कालः। एवञ्च तस्य क्रियात्मकत्वम्, न तु तार्किकोक्तद्रव्यत्वम्। इदञ्च "तपरस्तत्कालस्य" इति सूत्रे कैयटे स्पष्टमुक्तम्। तथा हि कालो हि प्रसिद्धपरिमाणक्रियाऽप्रसिद्धपरिमाणस्य क्रियान्तरस्य परिच्छेदिका यथा दिवसमधीते इति दिवसशब्देनोदयादिरस्तमयान्त आदित्यगतिप्रबन्ध उच्यते। स चाध्ययनस्य परिच्छेदकत्वात् कालः। एवञ्च दिक्काल-योर्द्रव्यान्तरत्वमयुक्तम्। तार्किकोक्तदिक्कालखण्डनं तु न युक्तिमत्। चेतनाचेतनयोरैक्यायोगात्। "सर्वं खल्विदं ब्रह्म" इत्यादि सर्वस्यापि तद्भिन्नत्वाभावात्। न च शाब्दिकानां पदार्थशोधोऽनुपयुक्त इति वाच्यं, तं विना प्रयोगसिद्धेरभावात्। तार्किकाणामेव त्वनुपयुक्तः, अनधीतशास्त्रस्यापि व्यवहारदर्शनात्।[181]

इति द्रव्यनिरूपणम्।

---

180. ग,घ (उपलब्धपाठे) *शिरोमणौ*

181. क, घ - *दिक्कालयोः पृथग् द्रव्यत्वमिति तार्किकाः। शिरोमणावुभयोरीश्वररूपत्वमुक्तम्। शाब्दिकास्तु दिक्कालौ नातिरिक्तं द्रव्यं दिक्कालावस्थिताङ्कशशिनिशेषस्यैव दिक्त्वम्। अखण्डकालस्य व्यवहारानाधायकत्वादभाव एव। एवञ्चाखण्डकालाभावे उपाधिवशात् तस्य खण्डकालत्वमिति कल्पनाप्यसाध्वी। यदुपाधिवशात् खण्डकालस्ते उपाधय एव सन्तु खण्डकालाः। तथा च सूर्यगतिविशेषः कालः। एवञ्च तस्य*

8. गुणनिरूपणम्

8.1 गुणत्वजातिमान् गुणः। गुणत्वजातिस्तु रूपादौ गुण इत्याकारकप्रत्यक्षेणैव सिद्धा। अन्ये तु द्रव्यकर्मान्यस्मिन् सामान्यवति *या कारणता तदवच्छेदकतया[182] तत्सिद्धिरित्याहुः। तत्र गुणो द्विविधः। सामान्यविशेषभेदात्। तत्र विशेषगुणत्वं त्वेकद्रव्यविभाजकोपाध्य-वच्छिन्नवृत्ति–अपरद्रव्यविभाजकोपाध्य वच्छिन्नावृत्तिजातिमत्त्वम्[183]। न चैवमनुष्णाशीतस्पर्शादावव्याप्तिः, तत्र पृथिवीस्पर्शवायुस्पर्शादौ जातिभेदाऽङ्गीकारात्। एवं पृथिवीजलरूपरसयोरपि जातिभेदाङ्गी-कारान्नाव्याप्तिः। ते च रूपरसगन्धस्पर्शसांसिद्धिकद्रवत्वस्नेहशब्द-सुखदुःखद्वेषप्रयत्नधर्माधर्मभावनाबुद्धय इति षोडश। अन्ये सामान्यगुणाः। तदुक्तं –

बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः।।
अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः।

क्रियात्मकत्वं न तु तार्किकोक्तद्रव्यत्वम्। इदञ्च "तपरस्तत्कालस्य" इति सूत्रे कैयटे स्पष्टमुक्तम्। तथा हि कालो हि प्रसिद्धपरिमाणक्रियाऽप्रसिद्धपरिमाणस्य क्रियान्तरस्य परिच्छेदिका यथादिवसमधीते इति दिवसशब्देनोदयादिरस्तमयान्त आदित्यगतिप्रबन्ध उच्यते। स चाध्ययनस्य परिच्छेदकत्वात् कालः। एवञ्च दिक्कालयोर्द्रव्यान्तरत्वमयुक्तम्। तार्किकोक्तदिक्कालखण्डनं तु न युक्तिमत्। चेतनाचेतनयोरैक्यायोगात्। "सर्वं खल्विदं ब्रह्म" इत्यादि सर्वस्यापि तद्भिन्नत्वाभावात्। न च शाब्दिकानां पदार्थशोधोऽनुपयुक्त इति वाच्यं तं विना प्रयोगसिद्धेरभावात्। तार्किकाणामेव त्वनुपयुक्तः। अनधीतशास्त्रस्यापि व्यवहारदर्शनात्। इत्येतावान् पाठो नोपलभ्यते

182. क – *वृत्तिकारणतावच्छेदकतया* इति पाठः

183. क,ख,ग,घ – *वच्छिन्नवृत्यजातिमत्वम्*

सङ्ख्यादिरपरत्वान्तो[184] द्रवोऽसांसिद्धिकस्तथा।।
गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः।'' इति।

8.2 अथ शाब्दिकाः गुणत्वं न जातिः, मानाभांवात्। रूपरसादौ गुण इत्याकारकप्रत्यक्षं नापामरसाधारणं येन तत्सिद्धिः स्यात्। नापि द्रव्यकर्मान्यस्मिन्नित्याद्युक्तरीत्या तत्सिद्धिः। एवं[185] प्रकारेण जातिसिद्धौ द्रव्यकर्मोभयसाधारण्यपि जातिः सिध्येत्। तस्मात् सङ्केतविशेषसम्बन्धेन गुणशब्दवत्त्वमेव गुणत्वम्। यद्वा द्रव्यभिन्नद्रव्यसमवेतत्वे सति कृतिसाध्यत्वासाध्यत्त्वोभयत्वमेव गुणत्वम्, समवायसम्बन्धेन द्रव्यस्य द्रव्य[186] वृत्तिसम्भवात्। तत्रातिव्याप्तिवारणाय द्रव्यभिन्नेति। द्रव्ये भावस्यापि वृत्तिसम्भवात् समवेतेति। कर्मसामान्यादावतिव्याप्तिवारणाय कृतिसाध्यत्वासाध्यत्वोभयवत्त्वेति। ध्वनितं चेदं "वोतो गुणवचनाद्" इति सूत्रे

सत्त्वे निविशतेऽपैति पृथग् जातिषु दृश्यते।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुण।।

इति वदता भाष्यकारेण। *अत्र पृथक्त्वं न गुणः इतरादिवदन्योन्या-भाववदर्थकत्वात्। यत्तु तार्किकाः पृथक्त्वं गुणः, न तु इतरार्थकः। अन्यारादिति सिद्धे पृथग् विनेति पञ्चमीविधानादित्याहुः[187] तन्न, पृथग् विनेत्यस्य द्वितीयातृतीयाविधानेन सार्थक्याद्, रूपं रसात् पृथगित्यादौ गुणे गुणानङ्गीकारेण रूपे पृथगित्यास्यानन्वयापत्तेश्च।

---

184. क – *सङ्ख्यादिरपरत्वान्तो*

185. क – *एवंविध*

186. क,ख,ग,घ – *द्रव्यस्याद्रव्ये*

187. क – *अत्र पृथत्त्वं गुणं न तु इतरार्थकः अन्यारादिति सिद्धे पृथग् विनेति पञ्चमीविधानादित्याहुः* इति पाठः

8.4 तार्किकास्तु नानाजातीय[188] रूपवदवयवारब्धे घटादावतिरिक्तं चित्ररूपम्, अन्यथा रूपस्य व्याप्यवृत्तित्वनियमाद् घटादेः प्रत्यक्षं न स्याद् इत्याहुः। शाब्दिकास्तु चित्ररूपं नातिरिक्तं, मानाभावात्। न च रूपस्य व्याप्यवृत्तित्वनियमाद् घटादेः प्रत्यक्षानुपपत्तिर्मानं, रूपस्य व्याप्यवृत्तित्व एव मानाभावः। स्वात्यन्ताभावसमानाधिकरणत्वरूपाव्याप्यवृत्तितायां[189]

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते।।

इति स्मृतिरूपप्रमाणसत्त्वात् रूपस्याव्याप्यवृत्तित्वम्। तथा च न प्रत्यक्षानुपपत्तिः। अस्तु वा स नियमः, तथापि न दोषः। भवन्मते चाक्षुषप्रत्यक्षं प्रत्युद्भूतरूपस्य हेतुत्ववत् मन्मते तत्समवायस्य हेतुत्वात्। न च गौरवं, धर्मिकल्पनातस्[190] तस्य हेतुत्व[191] कल्पनेन[192] लाघवात्। न च चित्ररूपमितिव्यवहारा[193] न्यथानुपपत्त्या तत्सिद्धिः, समानाधिकरण-विजातीयाव्याप्यवृत्तिनीलपीतादिरूपसमुदायात् तथाविधव्यवहारोपपत्तेः। *अन्यथा चित्रगन्धश्चित्ररसे इति व्यवहारात् तयोरतिरिक्तत्वापत्तेः[194]।

---

188. क - *नानाजातीयस्य*

189. क - *वृत्तितायां*

190. क - *कल्पनात्*

191. क - *अहेतुत्व*

192. ख - *कल्पनेन* इति नोपलभ्यते

193. क - *व्यवहारो*

194. ख - *चित्रगन्धश्चित्ररस इति व्यवहारयोरप्यतिरिक्तत्वापत्तेः* इति पाठः

स्पष्टं[195] चेदं[196] चित्रगन्धः कतकक्षोद[197] इति, भाषायाम्[198] अर्गजा इति प्रसिद्धः। पानकादौ[199] च चित्ररसः। न चेष्टापत्तिः, अपसिद्धान्तात्। न च घ्राणरसनयोर्द्रव्याग्राहकत्वान्न प्रत्यक्षानुपपत्तिस्तत्रेति वाच्यम्, तयोः संयुक्तसमवायेन गन्धरसग्राहकत्वाद् द्रव्यसम्बन्धं विना गुणमात्रग्रहासम्भवाच्च[200]। *चन्दनगन्धश्चम्पकगन्ध इत्यादिगन्धविशेषज्ञानासम्भवाच्च[201] तस्मात् केवलगुणग्राहकत्वं श्रोत्रस्यैव समवायेनैव तद्[202] ग्राहकत्वादिति शाब्दिकसमयः। अस्तु वा तथापि त्वगिन्द्रियस्य द्रव्यग्राहकत्वे विवादाभावाच्चित्रस्पर्शापत्तिस्तदवस्थैव[203]। चित्ररूपस्यातिरिक्तत्वे *कणादेन कण्ठतः सप्तदशोक्ताश्च[204] शब्देन सप्त गृहीता इति चतुर्विंशतीति भवत्[205] सिद्धान्तभङ्गापत्तिश्चेति दिक्।

इति गुणनिरूपणम्।

9. कर्मनिरूपणम्

9.1 तार्किकास्तु कर्मत्वजातिमत् कर्म। तच्चोत्क्षेपणापक्षेपणा-

---

195. ख – *स्पष्टः*

196. ख – चेदं इति नोपलभ्यते

197. क – *कतकक्षोद* इति नोपलभ्यते

198. क *भाषया*

199. क – *पालकादौ*

200. क – च इति नोपलभ्यते

201. क – *चन्दनगन्धश्चम्पकगन्ध इत्यादिगन्धविशेषज्ञानासम्भवाच्च* इति नोपलभ्यते

202. क – तद् इति नोपलभ्यते

203. क – *स्थैव* इति नोपलभ्यते

204. क – *कणादेन कण्ठत सप्तदशोक्ताश्च* इति

205. ख – *भवत्* इति नोपलभ्यते

कुञ्चनप्रसारणगमनादि[206] भेदात्[207] पञ्चविधम्[208]। भ्रमणादीनामपि[209] गमने[210]ऽन्तर्भावान्न पञ्चत्वव्याघात इत्याहुः।

9.2 **शाब्दिकास्तु** कर्मत्वन्न द्रव्यविभाजकोपाधिस्तस्य धात्वर्थतावच्छेदकफलशालिन्यपि शक्तत्वेन संशयग्रस्तत्वात्। किञ्च कर्मत्वं न जातिः, क्रियात्वेन साङ्कर्यात्। *तथा हि[211] क्रियात्वं विहाय कर्मत्वं घटं[212]पश्यसीत्यादौ घटे[213]। कर्मत्वं विहाय क्रियात्वं गच्छतीत्यादौ। तदुभयं पश्य मृगो धावतीत्यादौ। परस्परात्यन्ताभावसमानाधिकरणयोरेकत्र समावेशः साङ्कर्यमिति तल्लक्षणस्य[214] *तत्र सम्भवात्[215]। किं तु क्रियात्वं, तच्च फलनिष्ठजन्यतानिरूपितजनकताश्रयत्वम्। फलत्वञ्च धात्वर्थपरिच्छेदकत्वं जातिविशेषो वा। यद्वा कालनिष्ठपरिच्छेदकतानिरूपितपरिच्छेदकत्वम्, सङ्केतविशेषसम्बन्धेन क्रियापदवत्त्वमेव वा।

9.3 तत्पञ्चत्वकथनं त्वयुक्तमेव। अस्त्यादिवाक्यार्थस्योक्त*पञ्चानन्तर्भावेन[216] क्रियात्वाभावाद् धातुत्वानापत्तौ अस्तीत्यादि-

---

206. ख – *गमनानि*

207. ख – *भेदात्* इति नोपलभ्यते

208. ख – *पञ्चेति*

209. ख – *अपि* इति नोपलभ्यते

210. क – *गमना*

211. ख – *तथा हि* इति नोपलभ्यते

212. ख – *पश्यामि*

213. क – घटे इति नोपलभ्यते

214. ख – *लक्षणात्*

215. ख – *तत्र सम्भवात्* इति नोपलभ्यते

216. ख – *पञ्चान्तर्भावाभावेन*

प्रयोगानापत्तेः। भ्रमणादिवत् उत्क्षेपणादीनामपि[217] *गत्यन्तर्भावसम्भवेन पृथग्गणनस्य व्यर्थत्वात्।[218]भ्रमणादीनां गतित्वं, नोत्क्षेपणादीनामित्यत्र मानाभवात्। तत्रापि ऊर्ध्वं गच्छतीत्यादिव्यवहारसत्त्वात्।

इति कर्मनिरूपणम्

10. सामान्यनिरूपणम्

10.1 तार्किकास्तु सामान्यं[219] परापरभेदाद् द्विविधम्। परं स्वभिन्न-सामान्यव्यापकम्। अपरं स्वभिन्नसामान्यव्याप्यम्। तत्र सत्ता परैव घटत्वाद्य[220] परमेव। द्रव्यत्वादिकं तु स्वभिन्नपृथिवीत्यादेर्व्यापकत्वात्[221] स्वभिन्नसत्तायाश्च व्याप्यत्वात् परापरतया व्यवह्रियते। तल्लक्षणन्तु नित्यत्वे सत्यनेकसमवेतत्वम्। संयोगाकाशपरिमाणाभावेष्वति-व्याप्तिवारकाणि[222] नित्यत्वानेकसमवेतपदानीत्याहुः।

10.2 शाब्दिकास्तु सामान्यं न[223] पदार्थान्तरं मानाभावात्।

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानामेते पृथगवस्थिते।।

इत्यनेन शब्दस्यापि शाब्दबोधे भानाभ्युपगमात् तस्यैवा-

---

217. ख – *उत्क्षेपणमपि*

218. ख – *भ्रमणादीनां गतित्वं नोत्क्षेपणादीनामपि गत्यन्तर्भावसम्भवेन पृथग्गणनस्य व्यर्थत्वात्* इति पाठः

219. क – *सामान्यम्* इति नोपलभ्यते

220. क – घटाद्य

221. क – *व्यापकत्वा*

222. क – *वारणा*

223. क – *न* इति नोपलभ्यते

वच्छेदकत्वम्।

10.3 यद्यपि शाब्दिकैः घटत्वविशिष्टो घटपदवाच्यो[224] घट इत्युभयप्रकारको बोधः स्वीकृतस्थापि नवीनैः शब्दप्रकारक एव स्वीक्रियते, लाघवात्। तार्किकैरपि क्वचिदिन्द्रियादिपदे शब्दप्रकारक एव बोधः स्वीक्रियते। तथा च तेषां मते क्वचिच्छब्दप्रकारकः क्वचिज्जातिप्रकारकः क्वचिदुपाधिप्रकारक इति अननुगतमेव प्रकारत्वम्। अस्मन्मते च सर्वत्र शब्दस्यैवावच्छेकत्वमिति महल्लाघवम्। हरिणाप्युक्तं-

सामान्यान्यभिधीयन्ते सत्तावन्तैर्विशेषिता।
सञ्ज्ञाशब्दैस्[225] स्वरूपं वा प्रत्ययैस्त्वतलादिभिः।।

अत्र पूर्वपूर्वोपमर्दनेनोत्तरोत्तरस्य स्थितिः। सञ्ज्ञा च नाधुनिकसङ्केत एव किन्तु सङ्केतमात्रम्।

10.4 ननु शब्दस्यावच्छेदकत्वे पर्यायादावनेकशक्यतावच्छेदकत्वे गौरवमिति चेन्न, जातेः शक्यताच्छेदकत्वेऽपि शक्तताच्छेदक[226] गौरवस्य तव मतेऽपि[227] सत्त्वेन उभयोस्तुल्यत्वात्। मन्मते शक्यतावच्छेदक-शक्ततावच्छेदकयोरैक्येन लाघवाच्च। किञ्च क्लृप्त*प्रकल्प्यमानयोः[228] क्लृप्तं बलवदिति न्यायेन क्लृप्तस्य[229] शब्दस्यैवावच्छेदकत्व औचित्याच्च।

10.5 ननु तव मते विरूपाणामपि समानार्थानामित्यस्य किं

---

224. क - *वाच्ये*

225. ख - *शब्द*

226. क - *अवच्छेदकत्व*

227. क - *अपि* इति नोपलभ्यते

228. क - *कल्प्यमानयोः*

229. क - *क्लृप्त*

समानविशेष्यकाणामित्यर्थः, उत समानप्रकारकाणामित्यर्थः? नाद्यः, प्रमेयाभिधेये इत्यत्रैकशेषापत्तेः। अस्ति हि तत्र समानविशेष्यत्वम्। नान्त्यः, घटकलशयोः समानप्रकारकत्वाभावेनैकशेषानापत्तेरिति चेन्न, प्रमेयाभिधेययोः समान[230] विशेष्यत्वाभावात्। तथा हि यथा घटसत्त्वेऽपि नीलो घटो नास्तीति प्रतीत्या विशेष्ये[231] घटे नीलादिविशेषणकृतो भेदः। एवं प्रमाऽभिधारूपविशेषणकृतो विशेष्ये[232] भेदः स्वीक्रियते। अन्यथा घटकलशयोरिव भवन्मते तयोरपि[233] पर्यायतापत्तिः। एवञ्च समान-विशेष्यकाणामित्यर्थे दोषानवकाशः। अस्तु वा समानप्रकारकाणामिति तथापि न क्षतिः। घटकलशयोरपि तुल्यव्यक्तिवृत्तित्वरूपसमान-प्रकारत्वसत्त्वेनैकशेषस्य निर्बाधत्वात्। ननु तव मते न ब्राह्मणं हन्यादित्यादि निषेधस्य ब्राह्मणनामकशूद्रेऽपि प्रवृत्त्यापत्तिः, मन्मते तु तस्य जाति-विषयकत्वेन[234] शूद्रे प्रवृत्त्यभावादिति चेन्न, मन्मतेऽपि तुल्यत्वात्। तथाहि ब्राह्मणशब्दो द्विविधः जातिरूप उपाधिरूपश्च। नित्यत्वे सति वाच्यतासम्बन्धेनानेकव्यक्तिमात्रवृत्तिः[235] शब्दो जातिशब्दः। मात्र*पदं[236] सैन्धवादिनानार्थानां जातिशब्दत्वाभावाय, तेषां हि अश्वत्वविशिष्टेऽश्वे लवणत्वविशिष्टे लवणे वृत्तिसत्त्वेन व्यक्तिमात्रवृत्तित्वाभावात्। तद्भिन्न उपाधिशब्दः। एवञ्च देवदत्तेत्यादौ जातित्वाभावाद् "जातेरस्त्रीविषयाद-

---

230. क - *समान* इति नोपलभ्यते

231. क - *विशेष्य*

232. क - *विशेष्य*

233. क,ग,घ - *तयोरपि* इति नोपलभ्यते

234. क - *विषयत्वेन*

235. क - *व्यक्तिमान्*

236. क - *पदं* इति नोपलभ्यते

योपधात्" इति ङीषभावः। एवञ्च जातिपक्षो व्यक्तिपक्ष इत्यादि-व्यवहारोप्युपपद्यते।

10.6 ननु यत्र द्रव्यस्य प्रत्यक्षं तत्र निरवच्छिन्न एव बोधः स्यादिति चेन्न, तव मते संयुक्तसमवायेन जातेः प्रत्यक्षवन्मन्मतेऽपि शब्दस्य चक्षुःसंयुक्ते आकाशे समवायसत्त्वेन तेनैव सम्बन्धेन प्रत्यक्षसम्भवात्। न च बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपस्य कारणत्वादाकाशे रूपाभावेन अप्रत्यक्षत्वात्[237] तत्समवेतशब्दस्याप्रत्यक्षमिति वाच्यम्[238], तव मते वायौ रूपाभावेन प्रत्यक्षत्वेऽपि तदीयस्य स्पर्शस्य त्वाच[239] प्रत्यक्षवन्मन्मतेऽपि[240] शब्दस्य प्रत्यक्षसम्भवात्। *रूपप्रत्यक्ष एव तादृशनियमस्वीकारात्[241]। यद्वा चक्षुःसंयुक्तशक्त्याख्य[242] सन्निकर्षेण शब्दस्य प्रत्यक्षम्। एवञ्च शब्दस्य जातिवत्[243] सर्वेन्द्रियवेद्यत्वेऽपि क्षत्यभावः[244]। अथवा सुरभि चन्दनमित्यादौ चन्दनांशे प्रत्यक्षं सौरभांशे उपनीतभानवत् विशिष्य गृहीत[245] शक्तिकेभ्यः पदेभ्योऽर्थ*विशेषस्येव[246] अर्थाच्छब्दविशेषस्य[247] भानं

237. क – *अप्रत्यक्षात्*

238. क – *चेन्न*

239. क – *सत्त्वाद्*

240. क,घ – *अपि* इति नोपलभ्यते

241. क,ग,घ – *रूपप्रत्यक्ष एव तादृशनियमस्वीकारात्* इति नोपलभ्यते

242. क – *शत्त्यास्य*

243. ख – *जातिवत्*

244. क – *क्षत्यभावात्*

245. क – *विशिष्टगृहीत*

246. क – *विशेषस्यैवा*

247. ग – *विशेष*

भविष्यति। यथा नलपदवाच्यः कश्चिदिति पदविशेषणको वस्तु-सामान्यबोधः तथार्थदर्शनादपि। तद्वाचकं किञ्चित् पदमित्यर्थप्रकारकः पदविशेष्यको बोधो भविष्यति। अत एव विशेषजिज्ञासायाः[248] सामान्यज्ञानपूर्वकत्वाद् विशेषजिज्ञासायां किमस्य नामेत्यादिप्रश्नं प्रति वचनान्युपपद्यन्ते। अत एवोक्तं –

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमाद् ऋते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।

अन्यच्च

यत्सञ्ज्ञास्मरणं तत्र न[249] तदप्य[250]न्यहेतुकम्।
पिण्ड एव हि[251] दृष्टः सन्[252] सञ्ज्ञां स्मारयितुं क्षमः।।

इत्युक्तरीत्या स्मृतशब्दस्यावच्छेदकत्वसम्भवात्। एतेन शब्दस्या-वच्छेकत्वेऽनेऽमूकस्य[253] निरवच्छिन्नैव प्रत्यक्षं स्यादिति तार्किकोक्तम-पास्तम्।

10.7 सैन्धवशब्दस्य तु न जातिशब्दत्वम् अनेकवृत्तित्वेऽपि[254] व्यक्तिमात्रवृत्तित्वाभावात्। तेन हि अश्वपदवाच्यत्वेनाश्वोपस्थितिः। *एवं

---

248. क – *जिज्ञासायां*

249. *न* – इति नोपलभ्यते

250. क – *तदन्यप्य*

251. क – *हि* इति नोपलभ्यते

252. क – *तदन्यप्यन्य*

253. क – *ऽनेडशूकस्य*, ग,घ *नेदुमूकस्य*

254. क – *अपि* इति नोपलभ्यते

लवणपदवाच्यत्वेन लवणोपस्थितिः[255]। तथा च व्यक्ति[256]मात्रोपस्थापकत्वाभावात्, सैन्धवशब्दस्य न जातित्वम्। एवञ्च नानार्थत्वं शक्यतावच्छेदकभिन्नत्वे सति शक्ततावच्छेदकैकत्वम्[257]। भवन्मत[258] इव मन्मतेऽपि तुल्यम्। यद्वा मन्मते शक्ततावच्छेदकभिन्नत्वे सति शक्ततावच्छेदकतावच्छेदकत्वं नानार्थत्वम्। अस्ति हि शक्ततावच्छेदकम् अश्वलवणेति पदं तदवच्छेदकं सैन्धवपदमिति[259] लक्षणसङ्गतिः।

10.8 वस्तुतस्तु नानार्था नैव सन्ति। सकृदुच्चरितः सकृदर्थं गमयतीति[260] नियमात् अश्वलवणवाचकौ[261] सैन्धवशब्दौ भिन्नौ समानानुपूर्वीवशादेकत्वभ्रममात्रम्। तथा च सामान्यस्य पदार्थान्तरत्वास्वीकारे दोषाभावः। किञ्च भवन्मते सामान्यमखण्डोपाधिः सखण्डोपाधिरिति[262] पदार्थत्रयस्वीकारे गौरवम्। न चाखण्डोपाधेः सामान्येऽन्तर्भावो युक्तः। नित्यानेकसमवायित्वरूपतल्लक्षणस्य तत्राभावात्।

10.9 एवञ्च सामान्यं द्विविधं जातिरूपमुपाधिरूपञ्चेति तार्किकसिद्धान्तोऽपि निर्युक्तिकः। किञ्च नित्यानेकसमवायित्व-

---

255. क,ग,घ – *एवं लवणपदवाच्यत्वेन लवणोपस्थितिः*

256. क – *वृत्ति*

257. क – *शक्ततावच्छेदकत्वम्*

258. क – *तव मत*

259. क,ग,घ – *सैन्धवमिति*

260. ख,ग,घ – *प्रत्याययति*

261. क – *वाक्यौ*

262. क – *सखण्डोपाधिः* इति नोपलभ्यते

रूपसामान्यलक्षणानाक्रान्ताखण्डोपाधेः[263] सामान्येऽन्तर्भावश्चेत् तर्हि पृथिवी द्विविधा गन्धवती निर्गन्धा चेति तुल्ययुक्त्या तत्रापि[264] द्वैविध्यं परिकल्प्यातिरिक्तपदार्थमात्रोच्छेदप्रसङ्गः। किञ्च पृथिव्यादिनिष्ठ*-गन्धादिवन्न[265] तन्निष्ठजातिर्नियता येन तदभावो वक्तुं न शक्येत, किन्तु तार्किककल्पिता। अतस्तदस्वीकारे बाधकाभावः।

10.10 किञ्च भूतत्वं जातिः मूर्तत्वं नेति तार्किकोक्तं *न युक्तिमत्[266]। द्रव्यनिष्ठविलक्षण संयोगलक्षणासमवायिकारणजन्यतावच्छेदकत्वेन भूतत्वजातिसिद्धिवत् कर्मसमवायिकारणतावच्छेदकतया मूर्तत्वजातेरपि सिद्ध्यापत्तेः। न च परम*महा[267] परिमाणभिन्नपरिमाणत्वेन मूर्तत्व-व्यवहारोपपत्तेर्न मूर्त्तत्वं जातिरिति वाच्यम्, बहिरिन्द्रियग्रहण-योग्यविशेषगुणवत्त्वेन भूतव्यवहारोपपत्तेर्भूतत्वजातेरप्यसिद्ध्यापत्तेः। न च भूतत्वेन साङ्कर्यान्मूर्तत्वं न जातिः, मूर्तत्वेन साङ्कर्याद् भूतत्वं न जातिरित्यस्यापि वक्तुं शक्यत्वात्, साङ्कर्यस्य जातिबाधकत्वे मानाभावाच्च। अत एव मूर्तत्वं कर्मसमवायिकारणतावच्छेदकतया सिद्धो जातिविशेष इति वर्द्धमानोपाध्यायाः। एतेन न[268] भवत्येव मूर्तत्वं जातिरिति मिश्रमतमपास्तम्।

10.11 किञ्च तुल्यत्वं तुल्यव्यक्तिवृत्तित्वं स्वभिन्नजाति*-

---

263. क - *अखण्डोपाधिः*

264. क,ग,घ - *तवापि*

265. क - *आदि* इति नोपलभ्यते

266. क - *अयुक्तिमत्*

267. ख - *महत्*

268. ख - *न न*

समनियतत्वम्[269] यावत्। तच्च जातिबाधकम् एव[270] इत्येतदप्ययुक्तं विनिगमनाविरहेण कलशत्ववद् घटत्वमपि जातिर्न स्यात्। प्रसिद्ध्य[271] प्रसिद्ध्योस्तु सपथैकगम्यत्वेन तयोर्विनिगमकत्वाभावात्। यदपि अनवस्था जातेर्जातिसत्त्वे[272] बाधिकेत्युक्तं[273] तदपि न युक्तिमत्। निखिलजातिषु एकवैजात्याङ्गीकारेऽपि तद्वैजात्येन वैजात्यन्तरम् एकव्यक्तिकत्वात्[274]। *न च[275] निखिलजातिष्वेकवैजात्यं तद्वैजात्यं तदाश्रयजातिषु पुनर्वैजात्यमेवमनवस्थेति वाच्यम्, जातौ जातेः समवायसम्बन्धासम्भवेनानवस्थाया असम्भवात्। किञ्चानवस्था घटत्वत्व[276] जातेर्बाधिका उत पदार्थविभाजकोपाधिसामान्यत्वजातेरिति? नाद्यः, एकवृत्तित्वेन[277] जातित्वासम्भवात्। एवमन्त्योऽपि न, सर्वस्यापि सामान्यपदाभिधेयतया पूर्वोक्तयुक्त्याऽनेकत्वस्यासम्भवात्। शक्यस्यैव शक्तताच्छेदकत्वासम्भवाच्च। एवमनेककुतर्काभावाच्छब्दस्यैवावच्छेकत्वं युक्तम्।

इति सामान्यनिरूपणम्।

11. विशेषनिरूपणम्

11.1 तार्किकास्तु विशेषः पदार्थान्तरम्। तल्लक्षणं तु अनेका-

---

269. क,ग,घ – *समनियतम्*
270. क – *एव* इति नोपलभ्यते
271. क – *प्रसिद्ध*
272. ख,ग,घ – *मत्वे*
273. क,ग,घ – *बाधकमित्युक्तं* , ख – *इत्युक्तं* इति नोपलभ्यते
274. क,ग,घ – *एकव्यक्तित्वात्*
275. क,ग,घ – *ननु*
276. ग,घ – *घटत्व*
277. क – *एकव्यक्तित्वेन*

समवेतसमवेतत्वे सति समवेतशून्यत्वम्। अनेकासमवेतपदं सामान्येऽतिव्याप्तिवारकम्। *समवेतपदं सामान्यत्वादावतिव्याप्तिवारकम्।[278] रूपादावतिव्याप्तिवारकं समवेतशून्यत्वम्। स च परमाण्वादीनां परस्परं भेदकः। घटादीनां द्व्यणुकपर्यन्तानां तदवयवभेदात् परस्परं भेदः[279]। परमाणूनान्तु भेदकः स एव। स च स्वत एव व्यावृत्तः। स्वतो व्यावृत्तत्वं च स्वव्यावृत्तत्वबुद्धौ स्वभिन्नधर्मानपेक्षत्वमित्याहुः।

11.2 शाब्दिकास्तु विशेषो न पदार्थान्तरं, मानाभावात्।[280] न हि विशेषो योगिनामपि प्रत्यक्षः। तस्माद् बन्ध्यापुत्रवत्, सत्ताया अभावे दूरं परमाणूनां भेदकत्वम्। तव मते विनापि व्यावर्तकधर्मं यथा विशेषाणां व्यावृत्तिः, स्वत एव व्यावृत्तत्वात् तथा मन्मते परमाणूनामपि स्वत एव व्यावृत्तिर्भविष्यति।

12. समवायनिरूपणम्

12.1 एवं तार्किकमते[281] समवायोऽपि पदार्थान्तरम्। तत्र मानं तु गुणक्रियासामान्यविशिष्टबुद्धयो विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वाद् दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानम् । तस्य चानेकत्वे गौरवाल्लाघवादेकसमवाय[282] सिद्धिः। न च संयोग एवास्तु, द्रव्ययोरेव संयोग इति नियमात्। न च स्पर्शसमवायरूपसमवाययोरैक्याद्[283]

---

278. क – *समवेतपदं सामन्यत्वादावतिव्याप्तिवारकम्* इति नोपलभ्यते

279. क – *भेदकः*

280. क – *स्वकृत्* इति पाठः

281. क – *मतेऽपि*

282. क,ग,घ – *समवाय्य*

283. क – *समवायानैक्याद्*

वायौ रूपवत्ताबुद्धेः प्रमात्व[284]प्रसङ्गः, रूपनिरूपितत्वविशिष्ट-समवायनिरूपिताधिकरणताया एव[285] रूपसम्बन्धत्वात् तस्य वायावभावात् पृथिव्यां गन्धसमवायो, न जले इत्यादिप्रतीतेः समवायस्य नानात्वमिति नव्याः।

12.2 **अत्र शाब्दिकाः** समवायो न पदार्थान्तरम्, मानाभावात्। न चानुमानं मानम्, तस्य सम्बन्धविषयकत्वेन स्वरूपसम्बन्धेनैवोपपत्तेः। किञ्च रूपप्रतियोगिकसमवायेन घटादेः सम्बन्धो वाच्यः। स च स्वरूपसम्बन्ध एव। एवञ्च समवायस्वीकारेऽपि स्वरूपसम्बन्धस्या-वश्यकत्वात् तेनैव निर्वाहे मास्तु समवायः। अन्यथा तव मते समवायवद्-भूतलेऽभावस्यापि वैशिष्ट्यं[286] सम्बन्धान्तरं सिध्येत्[287]। ननु तन्नित्यमनित्यं वा? आद्ये घटवत्यपि भूतले घटाभावतद्वैशिष्ट्ययोर्नित्यत्वेन तत्र सत्त्वाद् घटाभावबुद्धिप्रसङ्गः। अन्त्ये अनन्तवैशिष्ट्यकल्पने गौरवम्। ननु वैशिष्ट्यानङ्गीकारे घटाभावभूतलयोः कः सम्बन्धः? स्वरूपमिति चेत्, तथा सति घटशून्यदशायामिव घटवत्तादशायामपि घटाभावबुद्धिप्रसङ्गः। घटाभावभूतलयोस्तत्तत्स्वरूपसम्बन्धस्य तत्र सत्त्वाद् इति चेत्, सत्यम्, घटाभाववद् भूतलमितिज्ञानकालीनं[288] यत्र भूतले घटाभावबुद्धिस्तद्-भूतलादिकं यस्य यस्याभावबुद्धिस्तस्येत्येतादृशस्वरूपविशेषसम्बन्धः, न तु स्वरूपसम्बन्धमात्रं, तथा च न पूर्वोक्तानुपपत्तिरिति चेन्न, समवायवैशिष्ट्यसाधकप्रतीते*रविशिष्टत्वेन[289] अर्द्धजरतीयाङ्गीकारस्या-

---

284. क – *प्रभ्रमत्व*

285. क – *एक*

286. क – *वैशिष्ट्य*

287. क – *सिध्यते*

288. ख,ग,घ – *ज्ञानकालीना*

289. क – *रपिशब्देन*

युक्तत्वात्। समवायवद्[290] वैशिष्ट्याङ्गीकारेऽपि न घटवदिति घटात्यन्ताभावबुद्धिः, घटवत्ताज्ञानस्य प्रतिबन्धकत्वात्। न च घटवत्ताज्ञान-विरहदशायां घटाभावबुद्धेर्जायमानायाः प्रमात्वप्रसङ्ग इति वाच्यम्, तदभाववति तत्प्रकारकज्ञानस्या*प्रमात्ववत्[291] तद्वति तदभावप्रकार-कस्यापि अप्रमात्वात्। पाकेन रक्ते घटे श्यामघटरूपसमवायसत्त्वेऽपि श्यामरूपवत्ता*बुद्ध्यभावाद्[292] घटवति भूतलेऽभावसत्त्वेऽपि[293] घटप्रतियोगिकाभावाभावात् प्रतियोगिभेदेनाभावभेदाभावाच्च। आत्मनो विभुत्वनित्यत्वेऽपि प्रतिशरीरं भेदवदभावस्यापि प्रतियोगिभेदेन भेदस्वीकारे बाधकाभावात्[294]।

इति समवायनिरूपणम्

13. अभावनिरूपणम्

13.1 तार्किकास्तु अभावः पदार्थान्तरम्। स च संसर्गान्योन्याभाव-भेदाद् द्विधा। संसर्गाभावत्वमन्योन्याभावभिन्नाभावत्वम्। अन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्न*प्रतियोगिकाभावत्वम्[295]। संसर्गाभावस्त्रिधा प्रागभावप्रध्वंसाभावात्यन्ताभावभेदात्। विनाश्यभावत्वं प्रागभावत्वम् जन्याभावत्वं ध्वंसत्वम्। त्रैकालिकसंसर्गाभावत्वमत्यन्ताभावत्वम्। ननु अत्यन्ताभावस्य नित्यत्वे घटवत्यपि घटाभावबुद्धिप्रसङ्ग इति चेन्न, कालविशेषविशिष्टस्वरूपस्य सम्बन्धत्वोपगमात्। घटवति भूतले

---

290. ख – *समवाय*

291. क – *प्रमात्व*

292. क – *अभावाद्*

293. क– *अपि* इति नोपलभ्यते

294. क – *बाधकाभावात्*

295. ख – *प्रतियोगिकसंसर्गाभावत्वम्*

तदभावात्। अत्यन्ताभावस्य नित्यत्वेऽपि तद्बुद्धेरभावात्। ननु घटकाले घटात्यन्ताभावबुद्धेरभावेऽपि घटोत्पत्तेः प्राक्काले तु स्यादिति चेत् सत्यम्, प्राचां मते ध्वंसप्रागभावाधिकरणे*ऽत्यन्ताभावास्वीकारात्[296]। ननु तर्हि रक्तरूपप्रागभावाधिकरणे श्यामघटे श्यामरूपध्वंसाधिकरणे च रक्तघटे कथं रक्तो नास्तीत्यन्ताभावप्रतीतिः। ध्वंसप्रागभावयोरप्य[297] धिकरणे*-ऽत्यन्ताभावस्यासत्त्वादिति[298] चेत्, सत्यम्, ध्वंसप्रागभावविषयिण्येव सा प्रतीतिः, न तु अत्यन्ताभावविषयिणीति प्राचां सिद्धान्तः। नवीनास्तु ध्वंसप्रागभावयोरत्यन्ताभावेन सह विरोधे मानाभावात्। ध्वंसादिकाल अवच्छेदेनात्यन्ताभावो वर्तत इत्याहुः।

13.2 **अत्र शाब्दिकाः** अभावस्य केवलाधिकरणस्वरूपे-णैवोपपत्तेरतिरिक्तत्वे मानाभावः। न चाभावाधिकरणयोरभेदे भूतले घटाभाव इत्येवमाधाराधेयभावो न स्यादिति वाच्यम्, यथा घटाभावो घटो नास्तीत्यादौ तवाभावाधिकरणकाभावस्याधिकरणानामेकत्वेऽ-प्याधाराधेयभावस्तथा ममापीति दोषासम्भवात्। नन्वेवं भूतले घटाभाव इतिवद् भूतले भूतलमिति प्रतीत्यापत्तिरिति चेन्न, यद्धर्मविशिष्ट-यद्धर्मावच्छिन्नवत्ता यत्र[299] न प्रतीयते तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्न-निरूपिताधिकरणता नोपेयते।

13.3 एवञ्च भूतले भूतलत्वावच्छिन्ननिरूपिताधिकरणत्वाभावाद् भूतले भूतलमिति प्रतीतेरभावः। भूतले घटाभाववत्त्वावच्छिन्न*-

---

296. ख - *अत्यन्ताभावाभावः*

297. ख,ग,घ - *अपि* इति नोपलभ्यते

298. क - *अत्यन्ताभावाभावात्*

299. क,ग,घ - *या*

ख - *यत्र* इति नोपलभ्यते

निरूपिताधिकरणताया:[300] स्वीकाराच्च भूतले घटाभाव इति प्रतीतिसम्भवः। ननु यत्र घट आनीतस्तदधिकरणं घटाभावस्वरूपं न वा? आद्ये घट आनीतेऽपि घटो नास्तीति प्रत्ययः स्यात्, अन्त्ये घटे नीतेऽपि घटो नास्तीति प्रत्ययो न स्यादिति चेन्न, अधिकरणातिरिक्ताभाव-वादिनोऽपि मतेऽत्यन्ताभावस्य नित्यत्वाद् घट आनीतेऽपि तदभाव-प्रत्ययस्य तुल्यत्वात्। अथ घटानधिकरणकालाद्यवच्छिन्नतत्तद्-भूतलादिकमेव घटाभावस्य सम्बन्धः। तेन सम्बन्धेन घटवति भूतले घटाभावस्य अविद्यमानत्वात्, न घटवति घटात्यन्ताभावबुद्धिरिति ब्रूषे तर्हि समं ममापि। एतावान् परं विशेषः तव तथासम्बन्धाभावान्न तथा प्रतीतिः, मम तु तादृशाधिकरणाभावान्न तथा प्रतीतिः।

13.4 अथवा विशिष्टसत्ताया अनतिरेकेऽपि यथा गुणकर्मान्यत्व-विशिष्टसत्तानिरूपिताधिकरणताया गुणे सत्त्वाद् गुणो गुणकर्मान्यत्व-विशिष्टसत्तावानिति प्रत्ययाभावस्तथा ममापि सघटभूतले तत्कालावच्छेदेन घटाभावाधिकरणताया अनङ्गीकारान्न घटाभाववत्ताबुद्धिप्रसङ्गः। एतेन कपाले घटो भविष्यति घटो नष्ट इति प्रतीतेरस्ति कपाले पूर्वं घटप्रागभाव उत्तरकाले घटध्वंसः। स यदि कपालात्मा तदा प्रागभावनाशकाले ध्वंसानुत्पत्तिक्षणे च कपालस्य सत्त्वात् तत्प्रतीतिः स्यात्। ध्वंसप्रागभावयो-र्घटकाले सत्त्वेऽपि प्रतीत्यस्वीकारे तद्रूपकपालप्रतीतिर्न स्यादिति दूषणमपास्तम्। तत्रापि घटकालावच्छेदेन घटप्रागभावध्वंसाधिकरणताया अनभ्युपगमात्।

13.5 न चात्यन्तिकदुःखध्वंसरूपमोक्षस्यात्मरूपत्वेन असाध्य-त्वापत्तिः, न चेष्टापत्तिः, श्रवणादीनामप्यनर्थकत्वापत्तेरिति वाच्यम्, नित्यसुखाभिव्यक्तेरेव मोक्षस्वीकारात्। अस्तु वा दुःखध्वंसस्य मोक्षत्वम्,

---

300. क – *निरूपिताया*

तथापि नासाध्यत्वरूपो दोषः, तन्निरूपिताधिकरणताया एव साध्यत्वोपगमात्। न चानन्ताधिकरणात्मकत्वकल्पने गौरवम्, तत्तदधिकरणानां क्लृप्तत्वेनातिरिक्तपदार्थस्वीकारापेक्षया तस्यैव लघुत्वात्। ननु शब्दगन्धरसाद्यभावानां तत्तदधिकरणात्मकानां तत्तदिन्द्रिय-ग्राह्यत्वेनाप्रत्यक्षं स्यादिति चेन्न, शब्दगन्धरसाधिकरणविशेषाणाम-भावरूपाणां तत्तदिन्द्रियाग्राह्यत्वस्वीकारे बाधकाभावात्, धर्मिकल्पनातो[301] धर्मकल्पनाया[302] लघीयस्त्वाच्च। एतावान् परं विशेषः तव मतेऽभावः पदार्थः कल्प्यः, तस्य च प्रत्यक्षं[303] विशेषणताख्यसन्निकर्षेण इति द्वयं कल्प्यम्। मन्मते तु शब्दरसगन्धाधिकरणविशेषाणां[304] तत्तदिन्द्रिय-ग्राह्यत्वमात्रं कल्प्यमिति महल्लाघवम्।

13.6 किञ्च घटाभाववति घटोपलब्धावपि घटाभाव-प्रत्ययवारणार्थं योग्यानुपलब्धेरपि अभावग्रहे हेतुत्वं त्वया वाच्यम्, तत्र योग्यस्य प्रतियोगिनो*ऽनुपलब्धिर्योग्यानुपलब्धिर्योग्येति वा योग्या वा सा चानुपलब्धिश्चेति वार्थः[305]? नाद्यः, जलपरमाणौ महत्त्वाभावप्रत्ययवत् पृथिवीत्वाभावग्रहापत्तेः। पृथिवीत्वं हि चक्षुर्योग्यं तदनुपलब्धिर्जलपरमाणौ पिशाचस्य प्रतियोगिनोऽयोग्यत्वात् स्तम्भे पिशाचभेदग्रहानुपपत्तेश्च। न

---

301. क – *धर्म्मिकल्पनाया*

302. क – *धर्मकल्पनाया* इति नोपलभ्यते

303. क – *प्रत्यक्ष*

304. क – *विशिष्टानां*

305. क – *अनुपलब्धिर्योग्ये वा योग्या चासावनुपलब्धिश्चेति*

ख – *अनुपलब्धिर्योग्ये योग्या चासावनुपलब्धिश्चेति*

ग – *अनुपब्धिर्योग्येति वा योग्या चासावनुपलब्धिश्चेति वार्थः*

घ – *अनुपब्धिर्योग्येति वायोग्या वासानुपलब्धिश्चेति वार्थः*

द्वितीयः, भूतले पिशाचात्यन्ताभावग्रहापत्तेः। ननु अन्योन्याभावग्रहे सप्तमीतत्पुरुषः, अत्यन्ताभावे षष्ठीतत्पुरुष इति चेन्न, जलपरमाणौ पृथिवीत्वात्यन्ताभावग्रहापत्तेः। वायावुद्भूतरूपवद्भेदग्रहाद्यनापत्तेश्च, न चेष्टापत्तिः, वायुर्न रूपवान् परमाणुर्न महान् इत्यादि*प्रत्यक्षाणां[306] प्रतीतीनां विनाश[307] प्रसङ्गात्। न तृतीयः, अनुगतस्य[308] योग्यत्वस्याभावात्। तथा हि अभावप्रत्यक्षसामग्रीविशिष्टा प्रतियोग्यनुपलब्धिरेव योग्यानुपलब्धिः। सा च पृथिवीत्वाभावग्रहे इन्द्रियसन्निकृष्टमहत्त्वोद्भूतरूपवद्विशेषणता वायावुद्भूतरूपाभावग्रहे तु इन्द्रियसन्निकृष्टमहत्त्ववद् विशेषणता। तथा च गौरवं[309] स्पष्टमेव[310]। मन्मते तु जलपरमाणुविशेषरूपपृथिवीत्वाभावेन चक्षुःसंयोगे प्रमाणाभावान्न तच्चाक्षुषम्। एतावान् परं विशेषः तव मते महत्त्वाभावात् परमाणोर्न चाक्षुषम्। मन्मते तु संयोगाभावात् वायोस्त्वक्-संयोगेन प्रत्यक्षत्वात् तद्रूपोद्भूतरूपवद्भेदस्यापि प्रत्यक्षम्। भूतले पिशाचात्यन्ताभावाग्रहस्तु तद्भूतलस्य तद्*रूपत्वा[311] नङ्गीकारात्। यद्वा तेन चक्षुःसंयोगाभाव एव कल्प्यते। एतावान् परं विशेषः। तव मते योग्यताभावान्न प्रत्यक्षम्[312]। *मम तु पिशाचात्यन्ताभाववैशिष्ट्येन भूतले चक्षुःसंयोगाभावान्न तत्[313]। त्वया कार्यवशादननुगता योग्यतोन्नेया। मया

---

306. क – *प्रत्यक्ष*

307. क – *विनाश*

308. क – *अनुगत*

309. क – *गौरवस्य*

310. क – *स्पष्टत्वमेव*

311. क – *रूपा*

312. क – *तत्*

313. क,ग,घ – *मम तु पिशाचात्यन्ताभाववैशिष्ट्येन भूतले चक्षुःसंयोगाभावान्न तत्* इति नोपलभ्यते

त्विन्द्रियसंयोग उन्नेयः।[314]

14. तार्किकपदार्थज्ञानस्य निःश्रेयसहेतुत्वमुत शाब्दिकपदार्थ-ज्ञानस्येति विचारः

14.1 किमथ[315] तार्किकपदार्थज्ञानस्य निःश्रेयसहेतुत्वमुतशाब्दिक-

---

314. संसूचना 1– ख–हस्तलेखे ततः परमपि अयं पाठो वर्तते– *ईश्वरेच्छाक्रियावत् परमाणुभ्यो द्व्यणुकादिक्रमेणासत्कार्यमिति तार्किकाः। शाब्दिकास्तु पञ्चीकृतेभ्यः शरीरमपञ्चीकृतेभ्यो भूतेभ्य इन्द्रियाणि। तल्लक्षणं तु सन्निकर्षे सति स्वविषयद्रव्यादिसाक्षात्कारजनकत्वम्। पञ्चीकरणं तु पृथिवीं द्विधा विधायार्द्धभागं चतुर्द्धा कृत्वा स्वेतरभागेषु मेलनम्। कर्णावच्छिन्नं शक्तिमन्नभः श्रोत्रम्। अतः शक्त्यपगमे बधिरस्य न शब्दोपलब्धिः। प्रतिबन्धादिकल्पने तु गौरवम्। दूरस्थशब्दस्य प्रदीपवत् प्रकाशो न तु वीचीन्यायेन शब्दस्यात्रागमनम्। भेरीशब्दं साक्षाच्छृणोमीति प्रतीतेः। इन्द्रियाणाम् इन्द्रियम् (मनश्च) अस्मि इति भगवद्वचनाच्च। इन्द्रियं विषयप्रकाशनसामर्थ्यमिति व्याख्यानाच्च। परस्वं नाददीतेति शास्त्रात् स्वत्वं शक्तिः। सङ्ख्या च पदार्थान्तरं, न गुणो, गुणादिष्वपि तद्वत्ताप्रत्ययात्। बाधकाभावान्न भ्रमोऽयमित्यादितार्किकपरस्परविसंवादेन निश्चयाभावे व्यवहारानापत्तौ सप्तत्वाभावे सप्त पदार्था इत्यप्यनुचितं शाब्दिकानां तु नैयत्वात् सर्वसम्मतत्वादेव सिद्धम्।*

संसूचना 2- ख–हस्तलेखे एतस्मात् पाठात् परं प्रत्यक्षनिरूपणस्य पूर्णतावचनं ग्रन्थस्य च पूर्णतावचनं दर्शितं तथा हि ख *हस्तलेखः- इति श्रीमन्मौलिकुलतिलकायमान भट्टगोवर्द्धनात्मज-भट्टरघुनाथसुत भट्टश्रीकृष्णविरचिते शब्दार्थतर्कामृते प्रत्यक्षं समाप्तम् । श्रीलक्ष्मीनृसिंहाय नमोऽस्तु। शुभम् । श्रीः संवत् 1885। ज्येष्ठशुद्ध 12 सोमवासरे समाप्तोऽयं ग्रन्थः। स्वार्थं परार्थं च। श्रीः।।*

संसूचना 3- इतः परं ख हस्तलेखे पाठो नास्ति। अतः क,ग,घ हस्तलेखान् आदाय अग्रे पाठभेदः प्रदर्श्यते।

315. क – *किन्तु*

पदार्थज्ञानस्य? तदत्र श्रुत्यनुभवतर्कमूलत्वं कस्य, कस्य नेति विचार्यते। तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेनेति श्रुत्युक्तसाधनैर्जातमुमुक्षोरात्मदर्शनमिष्टसाधनमिति। आत्मा द्रष्टव्य इति श्रुत्या ज्ञात्वा तत्रोपायजिज्ञासायां श्रोतव्यो मन्तव्य इति श्रुतिविहित-श्रवणाधिकारसिद्ध्यर्थंन्नित्यानित्यवस्तुविवेक आवश्यकः। स च नैषा तर्केण *मतिरापनेयेत्यसत्तर्क[316] वर्जनपुरःसरम् उपक्रमोपसंहारेत्यादि-षड्विधप्रमाणनिश्चित एकमेवाद्वितीयं ब्रह्मेत्यादिवेदार्थानुकूल-तर्कसाध्यः। तदर्थं सत्तर्कासत्तर्कौ विचार्येते।

14.2 तत्र वस्तुपदार्थो द्विविधो नित्योऽनित्यश्च। नित्य आत्मा तद्भिन्नपृथिव्याद्यनित्यः इति शाब्दिकादयः। तार्किकास्तु पृथिव्यप्तेजो-वायूनामनित्यत्वं नित्यत्वञ्च, आकाशकालदिगात्ममनसां नित्यत्वमाहुः। तदसत्, वेदविरुद्धत्वात्। एतस्मादात्मन आकाशः सम्भूत इत्युत्पत्ति[317] श्रवणात्। न चासत्कार्यवादे[318] सम्भूत इत्यस्याविर्भूत इत्यर्थः, वाय्वादीनामपि तथापत्तेः। न च वाय्वादौ सम्भूत इत्यस्य उत्पन्न इत्यर्थः, अनेकार्थत्वे गौरवापत्तेः। कालदिङ्मनसां नातिरिक्तद्रव्यत्वमिति द्रव्यनिरूपणे उक्तत्वाच्च।

14.3 किञ्चानियतत्वात्तेषामसत्तर्कत्वम्। तथाहि प्रमाणप्रमेयेत्यादि *न्यायस्यादिमसूत्रे विभागकथनादेव षोडशत्वेन लब्धे षोडशपदोच्चारणात् प्रमाणत्वादिषोडशपदार्थविभाजकोपाध्यवच्छिन्नपदार्थज्ञानान्निः-श्रेयसाधिगम इत्यर्थबोधकं षोडशपदार्थवादिन्यायसूत्रकारस्यादिमं सूत्रम्।

---

316. क - *साध्यातिशयोरेवेत्यसत्तर्क*

घ - *मतिरापनेयेत्यसत्तर्क*

317. क - *इत्युपपत्ति*

318. क - *चासत्कार्यवाद*

तच्च सप्तपदार्थवादिभिर्द्रव्यादिविभाजकोपाध्यवच्छिन्नाः सप्तैव पदार्था इत्युक्तम्। तत्रापि विभाग[319] कथनादेव सप्तत्वे लब्धे सप्तैवेत्युक्तिर्न्यूनाधिकव्यवच्छेदार्थम् इत्युक्त्वा शक्तिविषयतादीनां पदार्थान्तरत्वं स्वीकृतम्। तच्च परस्परविरुद्धमिति स्पष्टमेव सुधियाम्।

14.4 एवं निरङ्कुशतर्केण ऋषिप्रणीतं न्यायप्रारम्भसूत्रं खण्डितम्। एवं द्रव्याणि नवैवेत्युक्तिरपि। एतत्सर्वं भावोऽभावश्चेति वदता पदार्थद्वयवादिना खण्डितम्। ननु नेदं तन्मतखण्डनम्, अपि तु साधर्म्ये[320]ऽन्तर्भाव इति चेन्न, ततो लाघवात् पदस्यार्थः पदार्थ इति व्युत्पत्त्याऽभिधेयत्वमेव पदार्थ इत्यस्तु शाब्दिकसिद्धान्तः।

14.5 साङ्कु[321] शतर्केण नियतत्वात् न हि न्यायादिसूत्रस्यान्यथाकरणवद् व्याकरणादिसूत्रस्यान्यथाकरणं सम्भवति। तस्मात् श्रुत्यनुसारितर्केणार्थविशेषेण साधुत्वार्थं प्रवृत्तशाब्दिकानां वराटिकान्वेषणार्थं[322] प्रवृत्तस्य चिन्तामणिलाभवत् निःश्रेयसाधिगमो भवति। शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति इत्युक्तत्वाच्च।

15. भावकार्याणामुत्पत्तिविचारः

15.1 अथ त्रिविधकारणवतां भावकार्याणामुत्पत्तिः। अनन्यथासिद्धनियतपूर्ववृत्ति कारणम्। तत्त्वं कारणत्वम्। यत्समवेतं[323] कार्यमुत्पद्यते तत्समवायिकारणम्। यथा परमाणुर्द्व्यणुकस्य, कपालं घटस्य। समवायि-

---

319. क - *विभाज*

320. क - *साधर्म्या*

321. क - *सत्यङ्कुश*

322. क *वराटिकान्वेषणे*

323. क *यत्समवेत*

कारणे सम्बद्धं[324] कारणम् असमवायिकारणम्[325] यथा परमाणुद्वयसंयोगो द्व्यणुकस्य, कपालरूपं घटरूपस्य। एतदुभयभिन्नं कारणं निमित्तकारणं यथा द्व्यणुके ईश्वरः[326] घटे दण्डः।

15.2 तत्र समवायिकारणं सर्वत्र द्रव्यमेव। असमवायिकारणं द्रव्ये गुणः। गुणे गुणः कर्म च। कार्यमात्रं प्रति साधारणकारणानि[327] ईश्वरस्तज्ज्ञानेच्छाकृतयः प्रागभावकालदिगदृष्टानि। तत्र परमाणुद्वय-संयोगाद् द्व्यणुकमुत्पद्यते। *संयुक्तद्व्यणुकत्रयात् त्रसरेणुः। एवं चतुरणुकादिकपालान्तं कपालद्वयसंयोगेन घटो जायते सोऽन्त्यावयवी[328]। परमाणुद्व्यणुकानुमानं त्रसरेणुः[329] सावयवद्रव्यारब्धः बहिरिन्द्रिय-वेद्यद्रव्यत्वात् घटवत्। केवलतर्कमूलेयम्[330] उत्पत्तिप्रक्रिया सा चायुक्ता। तथाहि परमाणवः सावयवा[331] अनित्याश्च भूतत्वात् मूर्तत्वाद् वा घटवत्। यद्वा परमाणुरनित्यः कार्यत्वात् कपालवत्।

15.3 न च मनसोऽपि मूर्तत्वादनित्यत्वापत्तिरिष्टत्वात्। अत एवाणोरणीयान् महतो महीयानिति परमाणोरप्यणीयः[332] परमकारणं ब्रह्म

---

324. क *सम्बन्धं*

325. क *असमवायिकारणम्*

326. क *द्व्यणुकेश्वरः*

327. क *साधारणकारणम्*

328. क – *संयुक्तद्व्यणुकत्रयात् त्रसरेणुः। एवं चतुरणुकादिकपालान्तं कपालद्वयसंयोगेन घटो जायते। सोऽन्त्यावयवी*

329. क – *त्र्यसरेणुः*

330. क – *मूलेया*

331. क – *समवाया*

332. संसूचना 4- इतः परं घहस्तेखेऽपि पाठो नोपलभ्यते। अत एतस्मात् परं क,ग हस्तलेखावेवाश्रितौ।

दर्शयित्वा यस्मात् परन्नापरमस्ति किञ्चित् यस्मान्नोऽणीयो न ज्यायोऽस्ति किञ्चित् इति तैत्तिरीयश्रुतिस्तत्त्वतिरिक्तमणुमहच्चाविशेषेण प्रतिषेधति[333] *स नो[334] मनोऽधिसृजयते[335] एतस्माज्जायते प्राणो मनः सर्वाणीन्द्रियाणि इति तैत्तिरीयाथर्वणश्रुती[336] मनसः उत्पत्तिं स्पष्टमाचक्षाते।

15.4 किञ्च श्रुत्यनुभवानारूढः[337] केवलतर्केण चेदिष्टसिद्धिस्तर्हि मास्तु परमाणुद्व्यणुकं त्रसरेणुर्नित्यः[338] मूलकारणत्वात् यन्नैवं तन्नैवं यथा कपालादि। न च त्रसरेणुरनित्यः सावयवत्वात् घटवदिति सत्प्रति-पक्षत्वमिति वाच्यम्, लाघवमूलकतर्केण तस्य बाधितत्वात् यथा पर्वतो[339] वह्निमान् धूमात् पर्वतो वह्न्यभाववान् महानसान्यत्वात् इति सत्प्रतिपक्षत्वेऽपि अनुमितिः सर्वसम्मता तथा प्रकृतेऽपि।

15.5 किञ्च कार्यगुणं प्रति कारणगुणस्यासमवायिकारणत्वनियमात् द्व्यणुके महत्त्वाभावे कथं त्रसरेणौ महत्त्वोत्पत्तिः। किञ्च लाघवात् परमाणुत्रयसंयोगादेवास्तु त्र्यसरेणुः द्व्यणुकत्रयकल्पनया गौरवादिति दिक्। तस्माच्छ्रुतियुक्त्यनुभवविरुद्धत्वात् परमाणोरुत्पत्तिप्रक्रियाऽयुक्तेति दिक्।

15.6 किञ्चाणुद्वयसंयोगः व्याप्यवृत्तिरुताव्याप्यवृत्तिः? नाद्यः, संयोगस्याव्याप्यवृत्तित्वनियम इति स्वसिद्धान्तभङ्गापत्तेः। नान्त्यः अव्याप्यवृत्तित्वे सावयवत्वेनानित्यत्वापत्तेः। किञ्च परमाणू[340] विकृतौ

333. क – *प्रतिषेध*

334. क – *सतो*

335. क – *मनोऽधिसृजयते*

336. क – *तैत्तिरीयाथर्वस्वरस*

337. क – *श्रुत्यनुभवानारूढः*

338. क – *नित्य*

339. क – *पर्वतो*

340. क – *परमाणु*

अविकृतौ वा द्व्यणुकारम्भकौ ? नाद्यः, अनित्यत्वापत्तेः कपालादिवत्। नान्त्यः, धान्यराशिवत् परमाणुजन्यकादीनां सावयवद्रव्यत्वानापत्तेरिति दिक्। एवं प्रधानस्य जगत्कारणत्वम् इत्यपि "तदैक्षत बहु स्यां प्रजायेय" इतीक्षणपूर्वकसृष्टिश्रवणादचेतने प्रधाने तदभावादयुक्तम् इत्यलं प्रपञ्चेन।

15.7 प्रकृतमनुसरामः[341]। तमःप्रधानविक्षेपशक्तिसञ्ज्ञानापहित-चैतन्याद् आकाशादिपञ्चभूतानि[342] उत्पद्यन्ते। ज्ञानं माया अविद्या प्रकृतिः प्रधानं जगत् कारणमित्यादिपदवाच्यं सदसद्विलक्षणमहमज्ञ-प्रतीतिसाक्षिकं भावरूपमनिर्वचनीयं तृतीयं पदार्थान्तरं यथा स्त्रीपुंव्यतिरिक्तं नपुंसकत्वं प्रसिद्धं तथेदमपि। यद्वा अविद्यात्वं प्रमाणासहिष्णुत्वम् इदमेव लक्षणमविद्यायाः। अन्यथावस्तुत्वमेव स्यात्। तदुक्तं-

सेयं भ्रान्तिर्निरालम्बा सर्वन्यायाविरोधिनी।
सहते न विचारं सा तमो यद्वद् दिवाकरम्।।

दुर्घटत्वमविद्यायां भूषणन्न तु दूषणम्।
कथञ्चिद् घटमानत्वेऽविद्यात्वं दुर्घटं भवेद्।।

इदञ्चैकं सत्त्वरजस्तम इति गुणप्रपञ्चात्मकम्। "अजामेकां लोहितशुक्लकृष्णाम्" इति श्रुतेः। न च "इन्द्रो मायाभिः पुरुरूप ईयते" इति अनेकत्वप्रतिपादकश्रुतिविरोधः, मायाभिरज्ञो न वृत्तिरिति तदर्थात्। यद्वा व्यष्टिसमष्ट्यभिप्रायेणानेकत्वव्यपदेशः। अत्र परमाणुरूपे कारणेऽ-सत्कार्य्यमुत्पद्यत इत्यसत्कार्यवादिनः। तत्र ....[343] तदर्थमनेक-

---

341. क – *प्रकृतमनुशरामः*

342. संसूचना 5 – एतस्मात् परं ग हस्तलेखेऽपि पाठो नास्ति। क हस्तलेखमेवाश्रित्य इतोऽग्रे सम्पादनं विहितम्

343. *चटकपिकतिः असत्त्वाविशेषादाम्न स्यास्युत्पत्तिप्रसङ्गः* इति उपलब्ध-क-मातृकापाठः

तर्काश्रयणे गौरवम्। "सदेव सौम्येदमग्र आसीाद्"। तद्वद् "इदं तर्हि अव्याकृतमासीद्" इत्यादिश्रुतिविरोधश्च। सत्कार्यवादस्तु श्रुत्यनुकूल-तर्कमूलत्वात् प्रमाणम्। तत्राविर्भावतिरोभावमात्रमुत्पत्तिविनाशौ।

15.8 अथ[344] भौतिकेन्द्रियोत्पत्तिः। अपञ्चीकृताकाशादिगत-सात्त्विकांशेभ्यो तमः। आकाशाच्छ्रोत्रपादौ। तैजसं चक्षुर्वागिन्द्रिये। अब्भ्यां[345] जिह्वोपस्थौ। पृथिव्या घ्राणवागिन्द्रिये। कर्णशष्कुल्यवच्छिन्नं शक्तिविशिष्टं तमः श्रोत्रम्। तच्च समवायसम्बन्धेन केवलगुणग्राहकम्। एवं शक्तिविशिष्टत्वं सर्वेन्द्रियेषु बोध्यम्। अत एवेन्द्रियाणामिन्द्रियं विषयग्राहकसामर्थ्यमहमस्मीति भगवद्वाक्यम्, तानि विशिष्टग्राहकाणि। तत्र गुणविशिष्टद्रव्याणि द्रव्यविशिष्टगुणा वेति, वैशिष्ट्यप्रतियोगित्व-रूपप्रकारत्वेनाग्रहः।

15.9 केचित्तु घ्राणरसनयोः केवलगुणग्राहकत्वमाहुः। तत्त्वनुभवा-नुकूलतर्कहतम्। तथा हि गुणस्य व्याप्यवृत्तित्वेऽव्याप्यवृत्तित्वे वा गुणं विना द्रव्यस्य द्रव्यं विना गुणस्याभावात् केवलगुणेन सन्निकर्षाभावात् कथं केवलगुणप्रत्यक्षम्? इन्द्रियसंयुक्तद्रव्यसमवेतत्त्वेनेति चेत्, तर्हि द्रव्येऽपि संयोगसत्त्वेन द्रव्ये प्रत्यक्षसन्निकर्षसत्त्वात् कथं प्रत्यक्षरूप-कार्यानुपपत्तिः। अन्यथान्वयव्यतिरेकाभ्यां द्रव्यप्रत्यक्षे संयोगस्य कारण-तैवोच्छिद्येत। किञ्च गुणविशेषद्रव्यप्रत्यक्षाभावे कथमयं मालतीगन्धः चम्पकगन्ध इति विशेषप्रतीतिः। तथायमाम्ररसः, अयङ् गुड[346] रस इति विशेषप्रतीतिः। विशिष्टप्रत्यक्षवादिमते तु न काचिदनुपपत्तिः। एवं द्रव्ययोरेव हि संयोग इत्यत्र केवलद्रव्ययोः संयोगाभावाद् गुणविशिष्टद्रव्य-योरित्ययमर्थोऽवश्यं

344. *अयं* इति उपलब्ध-क-मातृकापाठः

345. *अवभ्यां* इति उपलब्ध-क-मातृकापाठः

346. गुण इति उपलब्ध-क-मातृकापाठः

बोध्यः। एवञ्च संयुक्तसमवायो न वाच्य इति लाघवम्। एवं वायुरपि त्वगिन्द्रियप्रत्यक्षः।

इति व्याख्यातं प्रत्यक्षम्।

16. अनुमाननिरूपणम्

16.1 अथानुमानं निरूप्यते। अनुमितिकरणमनुमानम्। अनुमितित्वं जातिः। व्यापारश्च तज्जन्यत्वे सति तज्जन्यजनकः। हेतुज्ञानादि करणम्। परामर्शो व्यापारः। परामर्शश्च व्याप्तिविशिष्टपक्षधर्मताज्ञानं यथा वह्निव्याप्यधूमवानयमिति। आदौ महानसादौ धूमवह्निसामानाधिकरण्यग्रहे सति धूमो वह्निव्याप्य इत्यनुभवो जायते। ततः पर्वते धूमे दृष्टे सति व्याप्तिस्मरणम् । ततश्च विशिष्टपक्षज्ञानं वह्निव्याप्यधूमवानयमिति तृतीयलिङ्गपरामर्शः। पक्षज्ञानसहितेन पर्वतो वह्निमानित्यनुमितिर्जन्यते।

16.2 व्याप्तिश्च हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यम्। न चायं संयोगवान् द्रव्यत्वात्[347] इत्यत्राव्याप्तिः, प्रतियोगिव्यधिकरणहेतुसमानाधिरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यम्। पक्षता च सिषाधयिषाविरहसहकृतसिद्ध्यभावः[348]।

16.3 अनुमानं द्विविधं स्वार्थं परार्थं च। तत्र परार्थं पञ्चावयवसाध्यम्। अवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि। यथायं वह्निमान् धूमात्। यत्र यत्र धूमस्तत्र तत्र वह्निः यथा महानसम्। वह्निव्याप्यधूमवानयं तस्माद् वह्निमान्। स्वार्थञ्च स्वीयव्याप्तिज्ञानसाध्यम्। तत्र परप्रत्ययार्थमेवाह शब्दप्रयोगम्। तच्चानुमानं द्विविधम्।

16.4 **शाब्दिकास्तु** अनुमितित्वं न जातिः, किन्तु सङ्केतविशेष-

347. *अद्रव्यत्वात्* इति उपलब्ध-क-मातृकापाठः

348. *पक्षता* इत्यपि उपलब्ध-क-मातृकायाम्

सम्बन्धेन परामर्शव्यापारकलिङ्गज्ञानजन्यज्ञानवृत्ति अनु पश्चात् मितिरिति व्युत्पत्त्याऽवयवार्थानुसन्धानपूर्वकपङ्कजादिवत् योगरूढोऽनुमितिशब्दः, अननुभूतजात्यवच्छेदकत्वापेक्षयानुभूतशब्दस्यैवावच्छेदकत्वस्य युक्तत्वादित्यादि सामान्यखण्डने उक्तत्वात्।

16.5 स पक्षो यत्र साध्यनिश्चयाभावः। एवञ्च केवलान्वयि-साध्यके घटोऽभिधेयः प्रमेयत्वात् इत्यादौ साध्यनिश्चयसत्त्वेन अत्यन्ताभावाप्रतियोगित्वेन केवलान्वयित्वे व्यतिरेककोटेरभावात् साध्यनिश्चयाभावाधिकरणत्वरूपपक्षताया अभावान्न केवलान्वयि-साध्यकानुमानम्। न च पक्षतालक्षणघटकाभावस्य न केवलनिश्चयं प्रतियोगी, किन्तु सिषाधयिषाविरहेति विशेषलक्षणविशिष्टः। तथा घटेऽभिधेयत्वमनुमिनुयामितीच्छायां विशेषणाभावप्रयुक्तविशिष्टा-भावसत्त्वान्न दोषः। अन्यथा पर्वते वह्निप्रत्यक्षे चाक्षुषसन्निकर्षसत्त्वे अनुमितिसामग्रीसत्त्वे अनुमिनुयामितीच्छायां च सत्यामनुमितिर्न स्यादिति वाच्यम्, तत्र प्रत्यक्षस्यैवानुभवसिद्धत्वात्।

16.6 न चात्र विवदितव्यम्, अनुमानापेक्षया प्रत्यक्षस्य प्राबल्यात्। अन्यथा पर्वते वह्निस्तिष्ठतीत्याप्तवाक्याच्चक्षुःसन्निकर्षादुष्णस्पर्शाच्च यत्र वह्निनिश्चयस्तत्राप्यनुमिनुयामितीच्छायाम् अनुमितिः स्याद्। न चेष्टापत्तिः, अनुभवविरोधात्, अनुमितेः प्रत्यक्षप्रमितिप्रतिबन्धकत्वकल्पने गौरवाच्च। प्रतिबन्धकत्वास्वीकारे ज्ञानद्वयापत्तेः। परस्परप्रतिबन्धात् तदभावापत्तेर्वा। अत्र साध्यनिश्चयस्य सिषाधयिषाविरहेण वैशिष्ट्यम् इत्युक्तेऽपि भिन्नकालीनपुरुषान्तरीयसिषाधयिषाविरहसत्त्वेनानुमितिरनुपपन्ना। तदर्थमेककालावच्छेदेनैकात्मवृत्तित्वमिति वाच्यम्, तथा च महद् गौरवम्।

16.7 किञ्च 'व्रीहीनवहन्ति' इति पर्वतेऽनुमानेनैव वह्निः साध्य इति नियमे न किञ्चित् फलमस्ति येन तत्रानुमितिरेव स्यात्। किञ्च पर्वतीयवह्नौ चक्षुःसन्निकर्षसत्त्वेन वह्निज्ञाने जाते सिद्धिसत्त्वेन सिद्धे

इच्छाविरहादनुमिनुयामिति सिद्धिप्रतिबन्धकोत्तेजिकेच्छाभावात् कथमनुमितिः इत्यभिप्रेत्यैव मीमांसकप्रभृतिभिः केवलान्वयि अनुमानं नास्तीत्युक्तम्। न चेह प्रमेयत्वमनुमिनोमीत्यनुभवानापत्तिः, मीमांसकानां तादृशानुभवाभावात्। न हि तार्किकानुभवः प्रमाणमित्यत्र मानमस्ति। तस्मात् सिषाधयिषाविरहविशिष्टेति न पक्षतालक्षणघटकाभाव-प्रतियोगिसिद्धिविशेषणं शाब्दिकमीमांकादिसम्मतम्। न हि तत्र गुरुभूतसिषाधयिषेति विशेषणं स्वीकृत्यानुमितिसम्पादने फलमस्ति। तस्मादनेकप्रमाणग्रामग्रासत्वे विरोधेऽविरोधे वा प्रत्यक्षमिव तथाऽसाधारणतया तदनुमानस्वीकारः। न चाभावप्रवेशेन गुरुत्वान्नेदं व्याप्तिलक्षणं, किन्तु यत्समानाधिकरणा यावन्तः साध्यसमाना-धिकरणास्तत्त्वमेवन्न दोष इति वाच्यं, तत्रापि यावत्त्वनिवेशेन गौरवस्य तुल्यत्वात्। केवलान्वय्यनुमानास्वीकारेण लाघवाभावाच्च। किञ्चानुमानेनानुमेयज्ञानप्रक्रियायां धूमं दृष्ट्वा वह्नौ सन्दिहानो व्याप्तिं स्मरतीत्यादिना सन्देहपूर्वकानुमितिरेव सर्वत्र ग्रन्थकारैरुक्तत्वेन सन्देहरहिते तदप्रवृत्तेरेव युक्तत्वात्। लौकिकप्रत्यक्षजन्यज्ञानविषयशून्येष्वेवा-नुमानादीनां प्रवृत्तिरिति सर्वसिद्धान्ताच्च। तस्मात् केवलान्वय्यनुमानं प्रत्यक्षप्रमित्यनुमितिसामग्रीसत्त्वे च पक्षातिरिक्तेऽनिश्चितसाध्यसाधन-सहचारकत्वं यथा पृथिवीतरेभ्यो भिद्यते पृथिवीत्वात् यन्नेतरेभ्यो भिद्यते तन्न पृथिवी यथा जलम् इति व्यतिरेक्यनुमानं वदन्ति तार्किकाः।

16.8 **अत्र शाब्दिकाः** अनुमानं त्रिविधमित्यत्र मानशब्दे नपुंसकत्वनिर्देशात् सपक्ष इत्यत्रान्यपदार्थे पुंलिङ्गे निर्देशः कृतः। स त्वयुक्तः। यदि अनुमीयतेऽनेनेति करणव्युत्पत्त्या ल्युडन्तः पुलिङ्गः कोसावनुमान इति भाष्यात् पुंलिङ्ग इति ब्रूषे तर्हि उद्देश्येऽपि स एवोचितः, न तूद्देशे नपुंसकः विधेयलिङ्ग उचितः, एकप्रसरताभङ्गप्रसङ्गात्। किञ्च व्यतिरेक्यनुमानं न प्रमाणान्तरं, घटो न जलमिति प्रत्यक्ष एव घटपृथिवी-

त्वावच्छेदेन तव भेदस्य गृहीतत्वात्। अन्यथा साध्याप्रसिद्धौ व्याप्तिग्रहाभावात् अनुमितिरेव न स्यात्। न च साध्यव्याप्येतरभेदाभावसाधनव्यापकपृथिवीत्वाभावायाव्याप्तिग्रहोऽस्त्वेवेति वाच्यम्, अन्याव्याप्तिग्रहादन्यानुमितेरदर्शनात्। अनुमितित्वावच्छिन्नं प्रति साध्यसाधनयोः सहचारग्रहस्यैव हेतुत्वात्, न तु साध्याभावहेत्वभावयोर्व्याप्तिग्रहः। प्रतियोगितासम्बन्धेन साध्यहेत्वोर्व्याप्तिग्राहक इति चेत्, सत्यम्, सा किं पक्षातिरिक्ते साध्यहेत्वोः सहचारनिश्चायक उत पक्षे? नाद्यः, पक्षातिरिक्तेऽनिश्चितसाध्यसाधनसहचारकत्वमिति स्वोक्तिविरोधात्। नान्त्यः, पक्षे निश्चयसत्त्वे पक्षतात्वव्याघातः, अनिश्चितसाध्यकस्यैव पक्षतात्वात्।

16.9 ननु इतरभेदस्य प्रत्यक्षत्वे जलादिपरमाणूनामतीन्द्रियत्वात् (तत्) प्रतियोगिकेतरभेदप्रत्यक्षाभावात् पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादिति व्यतिरेक्यनुमानमावश्यकमिति चेन्न, स्तम्भे पिशाचभेदप्रत्ययवदुपपत्तेः। तस्मात्तत्र प्रत्यक्षस्यैवानुभवसिद्धत्वादनुकूलतर्काभावाच्च, लाघवाच्च न केवलव्यतिरेक्यनुमानम्। किञ्च पर्वतो वह्निमान् पर्वतत्वादित्यत्र पर्वतत्वस्य यथा सर्वसपक्षविपक्षव्यावृत्तत्वासाधारणत्वरूपहेत्वाभासत्वं यथा पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यत्रापि पृथिवीत्वस्य सकलपक्षविपक्षव्यावृत्तरूपहेत्वाभासत्वम्। पक्षातिरिक्ते चानिश्चितसाध्यसाधनसहचारकत्वमित्यपि तुल्यमुभयोः। तथा च पृथिवीतरेभ्यो भिद्यते इत्यत्र सद्धेतुत्वं पर्वतो वह्निमान् पर्वतत्वादित्यत्र नेत्यत्र किं विनिगमकमिति विचारणीयं तर्ककुशलैः। तस्मात् अनुकूलतर्काभावात् फलाभावाच्च न केवलव्यतिरेक्यनुमानं प्रमाणम्। उभयसहचारग्रहीतृव्याप्तिकत्वमन्वयव्यतिरेकित्वम्। यथा पर्वतो वह्निमान् धूमादिति प्रसिद्धानुमानम्। अन्वयव्यतिरेकिणि हेतौ अवश्यं पञ्च–रूपोपपन्नतापेक्षणीया। पक्षसत्त्वं सपक्षसत्त्वं विपक्षव्यावृत्तत्वं सबाधितत्वम् असत्प्रतिपक्षत्वं चेति पञ्च

रूपाणि। यत्र साध्यसन्देहः स पक्षः। यत्र साध्यनिश्चयः स सपक्षः। यत्र साध्याभावनिश्चयः स विपक्षः। साध्याभावानपेक्षो बाधः। साध्याभाव-व्याप्यहेतुसत्त्वं प्रतिपक्षत्वम्।

16.10 एवञ्च पर्वतो वह्न्यभाववान् पर्वतत्वान्महानसान्यत्वाद् वेति सत्प्रतिपक्षसत्त्वात् कथं तस्य सद्धेतुत्वम्। न चात्र प्रतिपक्षव्यतर्कप्रकाशे तर्कामृते च प्रसिद्धे तूदाहरणे सत्प्रतिपक्षोदाहरणे चैतस्योक्तत्वात्[349]। एवञ्चानुमानं परस्परविरोधात् फलाभावाच्च न प्रमाणम्। न चानुमानाभावे 'क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वाद् घटवद्' इति ईश्वरसिद्धिर्न स्यादिति वाच्यम्, "द्यावाभूमी जनयन्देव एकः", "एतस्मादाकाशस्सम्भूत" इत्यादि-श्रुतिभिरेवेश्वरस्य सिद्धिसत्त्वात्। यद्वा चन्दनांशे लौकिकप्रत्यक्षं सौरभांशे उपनीतभानात्मकमलौकिकप्रत्यक्षम्। एवं धर्मांशे लौकिकप्रत्यक्षं वह्न्यंशे लौकिकमुपनीतभानात्मकम्। तथा चोभयत्रापि तुल्यत्वादस्तु उपनीत-भानमेव। उपलभ्यमानविनिगमकाभावेनैकत्रानुमानमपरत्रोपनीतभानमिति न[350] युक्तमत्। सहचारग्रहसापेक्षत्वमप्युभयोस्तुल्यं प्रमाणान्तरास्वीकारेण लाघवाच्च।।

17. हेत्वाभासनिरूपणम्

17.1 अथ हेत्वाभासा[351]निरूप्यन्ते। हेतुवदाभासन्ते इति योगाद् *दुष्टो धर्मो[352] हेत्वाभासपदवाच्यः। अनुमितितत्करणान्यतरप्रतिबन्धकत्वं व्यभिचारज्ञानस्य व्याप्तिप्रतिबन्धकत्वेनेति विवेकः। ते च सव्यभिचार-

---

349. संसूचना 6 – वाक्यस्य पूर्णतायै अग्रेऽपि कश्चन पाठः अत्र भवेत्, किञ्च उपलब्ध-क-पाठे इतः परं वाक्यपूरको वाक्यांशो नास्ति।

350. न इति उपलब्ध-क-पाठे नोपलभ्यते

351. *निनिरूप्यते* इति उपलब्ध-क-पाठः

352. दुष्टो *धर्मे* च इति उपलब्ध-क-पाठः

विरुद्धासत्प्रतिपक्षासिद्धबाधिताः पञ्च।

17.2 तत्र सव्यभिचारस्त्रिविधः। साधारणासाधारणानुपसंहारिभेदात्। साध्यवदन्यवृत्तित्वं साधारणत्वं यथा धूमवान् वह्नेः। साध्याभाववद् वृत्तित्वं न सम्यक्, कपिसंयोगी एतद्वृक्षत्वाद् इत्यत्र संयोगाभाववद्वृत्तित्वादेतद्वृक्षत्वस्यापि[353] तत्त्वापत्तिः। तदर्थं प्रतियोगिवैयधिकरण्यनिवेशे गौरवम्। अन्योन्याभावस्य च व्याप्यवृत्तित्वान्न दोषः। साध्यासमानाधिकरणं स्वसमानाधिकरणं वा। भवति हि धूमासमानाधिकरणे यद् धूमवदन्यत्वं तत्समानाधिकरणो वह्निः। एवं शब्दो नित्यः शब्दत्वादित्यादौ नित्यत्वासमानाधिकरणं यन्नित्यवदन्यत्वं तत्समानाधिकरणं शब्दत्वमिति साधारणेनैवासाधारणस्यापीति संग्रहः। तच्च निश्चितसाध्यवद् व्यावृत्तत्वे सति निश्चितसाध्याभाववद् वृत्तित्वम्, साध्यव्यापकीभूताभावप्रतियोगित्वं वा। तथा च सव्यभिचारस्य द्वितीयभेदो न कल्प्य इति लाघवम्। आकाशवान् धूमात् केवलान्वयिधर्मावच्छिन्नपक्षकत्वमनुपसंहारित्वम्। उदाहरणं सर्वमनित्यं प्रमेयत्वादित्यादि। यद्वा प्रवृत्तिसाध्यहेत्वन्यतरत्वम्। आकाशवान् धूमात्। धूमवानाकाशात्। लाघवादवृत्तिसाध्यकत्वमिति वा। न चैवं धूमवानाकाशादित्यादेरसङ्ग्रहः स्वरूपासिद्ध एव तन्निवेशात्।

17.3 साध्यासामानाधिकरणत्वं विरुद्धत्वं यथा गौरश्वत्वादिति। यद्यप्यत्र साधारणत्वमस्ति, तथाप्युपाधिभेदाद् भेद इत्याहुः, तन्न, गौरवात्। यद्वा साध्याभावव्याप्तो हेतुर्विरुद्धः, घटो नित्यः सावयत्वादिति।

17.4 पक्षे साध्यप्रतिबन्धकपरामर्शः सत्प्रतिपक्षः। यद्वा पक्षे साध्याभावव्याप्यहेतुसत्त्वं सत्प्रतिपक्षत्वम्। यद्वा साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः। यथा पर्वतो वह्निमान् धूमात्, पर्वतो वह्न्यभाववान्

---

353. *आपातित्त्वापत्तिः* इति उपलब्ध-क-पाठः

पाषाणमयत्वादित्यादौ वह्निव्याप्यवत्तापरामर्शसत्त्वान्न वह्न्यभावानुमितिः। वह्न्यभावव्याप्यवत्तापरामर्शाच्च न वह्न्यभावानुमितिः। तद्विशिष्टबुद्धित्वावच्छिन्नं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वादिति। केश्चिदत्र संशयाकारानुमितिरिष्यते।

17.5 असिद्धिस्त्रिधा। सा च व्यभिचाराद्यन्यपरामर्शप्रतिबन्धकधर्मवत्त्वम्। स्वरूपासिद्धिः, आश्रयासिद्धिः, व्याप्यत्वासिद्धिश्चेति। पक्षतावच्छेदकविशिष्टपक्षे हेतुतावच्छेदकावच्छिन्नहेतोरभावः स्वरूपासिद्धिः। यथा घटः पृथिवी, पटत्वात्। यत्र पक्षोऽसन् सिद्धसाधनं वा आश्रयासिद्धिः। यथा शशविषाणं नित्यमजन्यत्वात्। शरीरं हस्तादिमत् हस्तादिमत्तया प्रतीयमानत्वात्। यद्वा पक्षे पक्षतावच्छेदकासिद्धिः आश्रयासिद्धिः। यथा गगनकमलं सुरभि कमलत्वादित्यत्र कमले पक्षे गगनीयत्वाभावः। यद्वा पक्षावृत्तिर्हेतुः स स्वरूपासिद्धः यथा पर्वतो वह्निमान् महानसत्वात्। स च विशेषणासिद्धः विशेष्यासिद्धः भागासिद्धश्चेति भेदाद् बहुविधः। आद्यो यथा शब्दो नित्यश्चाक्षुषत्वे सति जन्यत्वाद्। द्वितीयो यथा शब्दो नित्यः गुणत्वे सति परमाणुवृत्तित्वात्। तृतीयो यथा एतानि द्रव्याणि निरवयवत्वात्। स्वरूपासिद्धिः आश्रयासिद्धिभिन्नत्वविशिष्टासिद्धित्वं व्याप्यवृत्तित्वसिद्धित्वं यथा पर्वतो वह्निमान् धूलीपटत्वात्। अन्ये तु सोपाधिर्व्याप्यत्वासिद्धिः। यथा धूमवान् वह्नेरिति। साधारणेनैवेतस्य सिद्धत्वादयमपि भेदो व्यर्थः। तस्मादसिद्धिर्द्विविधैव।

17.6 पक्षे साध्यशून्यत्वं बाधः यथा जलह्रदो वह्निमान् द्रव्यत्वात्।

17.7 ननूपाधिरपि हेत्वाभासान्तरमस्ति कथमेते एवेति चेत्, सव्यभिचाराद्यन्यतरत्वं हि हेत्वाभासत्वम्। न चोपाधिस्तदन्यतर इति[354]तस्मान्नैवंभूतत्वात्। एवं सिद्धसाधनमपि न हेत्वाभासान्तरम्। ननु

---

354. *तस्मान्नेव भूतत्वात्* इति उपलब्ध-क-पाठः

कोऽयमुपाधिः? साध्यव्यापकत्वे सति साधनाव्यापकः। धूमवान् वह्नेरित्यत्रार्द्रेन्धनं भवति हि तत्साध्यव्यापकं वह्निमदयःपिण्डे तदसत्त्वाद् अयं शुद्धसाध्यव्यापकः, काकः श्यामो मित्रातनयत्वाद् इत्यत्र मित्रा-तनयत्वावच्छिन्नश्च साध्यव्यापकत्वावच्छेदकपाकजन्यत्वमुपाधिः[355]। तथा ध्वंसो विनाशाजन्यत्वात्, अत्र जन्यत्वावच्छिन्नविनाशित्वव्यापकं तावत्त्वम् उपाधिः। शुद्धसाध्यव्यापकः, पक्षधर्मावच्छिन्नसाध्यव्यापकः, साधनावच्छिन्नसाध्यव्यापक एवमुपाधिस्त्रिविधः।

17.8 वस्तुतस्तु यथा शक्तिः रजतवदाभासमानापि न रजत-कार्य्यकारिणी एवं हेतुवदाभासमाना अपि सव्यभिचारादयो नानुमिति-जनकाः। तथा च *दुष्टो धर्मो[356] हेत्वाभासपदवाच्यः। अयमेव चास्य दोषः यदनुमितिहेत्वभावे[357]ऽपि तद्वदाभासमानत्वम्। तथा चानुमिति-तत्करणान्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वमिति लक्षणं फलितम्। एवञ्चोपाधिसिद्धसाधनयोरपि तल्लक्षणाक्रान्तत्वादुपाधि-स्वीकारे बाधकाभावः। न चानयोः सव्यभिचारादिपञ्चान्यतमत्वं नास्तीति वाच्यम्, तल्लक्षणस्य दुष्टत्वात्। तमब्निर्देशे कर्तव्ये तरब्निर्देशः। यथा गौरश्वत्वादि[358] उष्ट्रादीनां साधारणादिष्वन्तर्भावसम्भवेन पञ्चैवेति संख्याविशेषनियमनस्याप्ययुक्तत्वम्, अन्यतमत्वनिवेशे गौरवञ्च।

17.9 तस्मादेतादृशमिष्टमपि सव्यभिचाराद्यन्यतमत्वं हेत्वाभासत्व-मिति लक्षणमाश्रित्य अनयोर्हेत्वाभासत्वाभावविधाने[359] यथा साधूनेव

---

355. *कास्कः शापोमित्रात् लघुत्वावच्छिन्न* इति उपलब्ध-क-पाठः

356. दुष्टो *धर्मे* च इति उपलब्ध-क-पाठः

357. *हेत्वभावेऽपि* इति उपलब्ध-क-पाठः

358. उपलब्ध-क-मातृकापाठः अस्पष्टः

359. *हेत्वाभासत्वमविधाने* इति उपलब्ध-क-पाठः

प्रयुञ्जीत नासाधून्, एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवतीति, हेलयो हेलयः कुर्वन्तः पराबभूवुरिति व्याकरणबोधितसाध्वसाधुशब्दोच्चारणयोः श्रुतिप्रतिपादितविधि-निषेधगुणदोषश्रवणमस्ति, न तथा प्रकृते। तस्मात् काकदन्तपरीक्षावद् वृथायं विचारः। न च वादिविजयः प्रयोजनं, प्रतीतिलाघवानुभवासाधारण-भवदभिभूतविजयसाधकयुक्तीनामभावे वचनमात्रेण तस्याभावात्। तस्माद्यथामङ्गललक्षणं विनायकस्तवपाठव्यावृत्ते सत्यनुक्तविनायक-स्तवपाठस्य मङ्गलत्वन्नास्तीति गुरुभूतकार्यकारणभावं स्वीकृत्योक्तम्, तथैव लाघवे सत्यपि गुरुभूतव्यभिचारान्यतमत्वलक्षणमाश्रित्य उपाधिसिद्धसाधनयोर्हेत्वाभासत्वाभावप्रतिपादनमाहोपुरुषिकामात्रम्।

17.10 यथा सर्वानुभवसिद्धापि व्यञ्जना शैत्यपावनत्वादिविशिष्टे लक्षणां स्वीकृत्य भवद्भिर्न स्वीक्रियते तथा मयाप्यनयोर्हेत्वाभासत्वं स्वीकृत्य तत्पृथक्त्वं न स्वीक्रियते। अन्यथान्तर्भावकथैवोच्छिद्येत। किञ्च शुक्तिरजतवदहेतौ हेतुत्वप्रकारकं[360] ज्ञानं भ्रमः। स चोपाध्यादिसाधारणः। न च भ्रमत्वावान्तरभेदविचारप्रयोजनमस्ति।

17.11 वस्तुतस्तु यथा साधुत्वविवेकस्य व्याकरणाधारत्वादन-धीतव्याकरणस्य तदभावात् अध्येयं व्याकरणं, न तथा तर्कशास्त्रम्। तज्ज्ञानविधुरस्यापि ग्रामीणस्य धूमादिज्ञानेन वह्निज्ञानसम्भवात्। अन्यथाऽनधीतव्याकरणानां साधुशब्दज्ञानाभावात् अनधीततर्काणां पदार्थमात्रबोधो न स्यात्।

17.12 किञ्चाग्नये त्वा जुष्टं निर्वपामीति प्रकृतिभूतेऽग्नियागे मन्त्रः पठ्यते। तस्य विकृतिभूतसूर्य्यदेवताके यागे चतुर्थेनाग्निपदस्थाने प्रकृतिवद् विकृतिः कर्तव्येति चतुर्थ्यन्तं सूर्य्यपदमुह्यते। तथा स्थूलपृषतीमनड्वाही-

---

360. *हेतुत्वप्रकारकत्वं* इति उपलब्ध-क-पाठः

मालभेतेत्यत्र तत्पुरुषबहुव्रीहिसन्देहस्य स्वरावृत्तिर्जायते इत्यादीनि व्याकरणसाध्यप्रयोजनानि केवलतर्केणापि साधितुं शक्यन्ते तार्किकैः।

17.13 किञ्च साधुशब्दे ज्ञानोपायव्याकरणस्यादिसूत्रम् अ इ उ णिति अक्षरचतुष्टयात्मकं न तत् केवलतर्कसहस्रेण लाघवगौरव-प्रतीत्यनुभवरूपेणान्यथाकर्तुं शक्यम्। प्रमाणप्रमेयेत्यादिन्यायस्य आदिमं सूत्रं षोडशपदार्थप्रतिपादकं द्रव्यादिसप्तपदार्थवादिभिः खण्डितम्। तथा प्रत्यक्षशब्दयोः प्रत्यक्षेण आप्तवाक्येन वा स्वीकृत्यानुमानं खण्डितं **शाब्दिकैः**। एवं परमाणुभ्यो जगत्त्वापत्तिरित्यपि सदेव सौम्येदमग्र आसीदित्यादिश्रुत्यनुसन्धानेन परमाणुप्रक्रिया निरस्ता प्राक्।

17.14 परार्थानुमानं पञ्चावयववाक्यजन्यमपि शब्द एव। यदि अनुमाने आग्रहश्चेत् तर्हि व्यवहारेणासाधारणधर्मरूपं लिङ्गं ज्ञात्वा लिङ्गिज्ञानं येन तदनुमानम्।

17.15 किञ्चोपाधिस्त्रिविध इत्यप्यसङ्गतम्, उदासीनधर्मा-वच्छिन्नस्य साध्यव्यापकत्वरूपचतुर्थपक्षस्यापि सम्भवात्। तथा हि साधनपक्षातिरिक्तो यो धर्मः स उदासीनधर्मः यथा प्रागभावो विनाशी प्रमेयत्वात्। अत्र जन्यत्वरूपो यो धर्मः स उदासीनश्चतुर्थः पक्षः। अत्र भावत्वमुपाधिः।

17.16 **तस्माच्छाब्दिकैः** केवलतर्काणाम् [361]अव्यवस्थिततत्वेन पदार्थतत्त्वज्ञानाभावात्, "नैषा तर्केण मतिरापनेया" इति निषेधात्, अनुपयुक्तत्वादयं विचार उपेक्षितः। व्याकरणविचारस्तु "ब्राह्मणेन निष्कारणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति सन्ध्यावन्दनवद् विहितत्वात्, "तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै" इति निषेधाद्, "एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति" इति

361. *व्यवस्थिततत्वेन* इति उपलब्ध-क-पाठः

फलश्रवणाच्चाश्रितः। इत्यलमसक्तविचारेणेति दिक्।

इति व्याख्यातमनुमानम्।

18. उपमाननिरूपणम्

18.1 अथोपमानं निरूप्यते। तत्रोपमितिकरणमुपमानम्। उपमितित्वं चोपमिनोमीत्यनुभवसिद्धो जातिविशेषः। शब्दविषयकत्वाव्यभिचारिजातिमत् परोक्षत्वं वा। वह्निमानित्यादि अनुमित्यादिवारणाय जातिमदन्तम्। श्रावणत्वस्य शब्दविषयत्वावश्यम्भावात् तत्रातिव्याप्तिवारणाय परोक्षपदम्। कीदृशो गवय इति प्रश्ने गोसदृशो गवय इत्युत्तरिते यदा गोसदृशं प्राणिनं पश्यति तदा पूर्वोक्तवाक्यार्थस्मरणानन्तरमयं गवयपदवाच्य इति शक्तिग्रहः। स उपमितिः। अत्रातिदेशवाक्यार्थज्ञानं करणम्, सादृश्यज्ञानं सहकारि, अतिदेशवाक्यार्थस्मृतिर्व्यापार उपमितिः फलमिति सम्प्रदायमतम्। आवश्यकत्वात् सादृश्यज्ञानं कारणम्। अतिदेशवाक्यार्थस्मृतिर्व्यापारः उपमितिः फलमिति नवीनाः।

18.2 अत्र **शाब्दिकाः** उपमितिर्न मानान्तरं, किन्तु मानसम्। न चोपमित्यनन्तरमुपमिनोमि इत्यनुव्यवसायस्य मानसान्तरानुदयेनानुमित्यन्तरमुदयेन च सिद्धाया अनुमितेरपि मानसातिरिक्तत्वं विलीयेतेति वाच्यम्, इष्टत्वात्। न चानुमित्यादेर्मानसत्वे तदुत्तरे साक्षात्करोमीत्यनुव्यवसायापत्तिः, अनुमित्यादेः साक्षात्कारत्वादिति वाच्यम्, लौकिकविषयताशालिसाक्षात्कारस्यैव तादृशप्रतीतिविषयत्वात्। अत एव सुरभि चन्दनमित्याद्युपनीतभानानन्तरं चन्दनं पश्यामि, न सौरभमित्यादिसार्वजनीनः प्रत्ययः। एवञ्च लौकिकविषयतायाः साक्षात्कारत्वव्यञ्जकतया नानुमित्याद्युत्तरं साक्षात्करोति प्रत्ययः। वह्न्यादिगोचरप्रवृत्तेर्वह्निव्याप्यवत्तापरामर्शदर्शनमूलकप्रत्यक्षादेवोपपत्तेर्नानुमानस्य प्रमाणत्वम्। न चान्वयव्याप्तिज्ञानकरणे साध्यज्ञानस्यावश्यकत्वात् वह्न्यादिविषयकोपपत्तावितरभेदशून्यकालीनेतरव्यापकीभूता-

भावप्रतियोगिपृथिवीत्ववती पृथिवीति व्यतिरेकव्याप्तिज्ञानकरणेतरभेदज्ञानाभावात् तदुपनीतभानासम्भवेन तत्र प्रतीत्यन्तरस्वीकार आवश्यकः इति वाच्यम्, अभावत्वादिसामान्यलक्षणसन्निकर्षबलादेवेतरभेदगोचरप्रत्यक्षोपपत्तेः व्यतिरेक्यनुमानस्य सर्वैर्दूषितत्वात्।

18.3 किञ्चानुमिनोमीत्यनुव्यवसाय ईश्वरयोगि अनधीततर्काधीततर्केषु सन्ध्येकस्य प्रमाणत्वेनाश्रीयते नेश्वरयोगिनोस्तयोः, सर्वविषयकप्रत्यक्षसत्त्वेनानुमित्युपमित्योरसम्भवात्। अनधीततर्कस्य तु यथा लौकिकप्रत्यक्षसंयोगादयः सन्निकर्षास्तथा लौकिकविजातीयमानसरूपप्रत्यक्षेऽत्र ते अतिदेशवाक्यार्थज्ञानव्याप्तिज्ञानादय उपायाः। नैतावता प्रमाणान्तरसिद्धिः। अधीततर्काणान्तु अहोपुरुषिकया जायमानोऽपि अनुव्यवसायः सर्वेषां सम्मतः। यथालङ्कारिकाणां सम्मतापि व्यञ्जना युक्तिसिद्धापि तार्किकैर्लक्षणान्तर्भावं स्वीकृत्यतिरिक्ता न स्वीक्रियते। यथा च अर्थापत्त्यादिप्रमाणचतुष्टयस्यानुमानान्तर्भावादतिरिक्तत्वं न स्वीक्रियते। यथा वा प्रमाणादिषोडशपदार्थानां सप्तपदार्थेष्ववान्तर्भावः तत्त्वेऽपि तदनापत्तिर्न दोषः। तथा प्रकृतेऽपि तदनापत्तिर्न दोषः, लाघवरूपसाधकस्य तुल्यत्वात्।

18.4 यद्वोपमितेः शाब्दान्तर्भावः। न च शाब्दबोधसामान्ये पदजन्यपदार्थोपस्थितेर्हेतुतया तज्जन्यभाने चोपमित्युत्पत्त्या नोपमितेस्तद्रूपत्वमिति वाच्यम्, गोसदृशो गवयपदवाच्य इत्याकारकं गोसदृशाश्रये गवयपदवाच्यत्वावगाहिज्ञानमुपमानम्। ततश्च गोसादृश्यावच्छिन्ने गवयपदवाच्यत्वावगाहिनी उपमितिरुपपद्यते। तत्र गवयत्वविशिष्टोपस्थापक-पदाभावे सादृश्यविशिष्टोपस्थापकपदसत्त्वाच्छाब्दत्वे बाधकाभावात्। न च गवयत्वापेक्षया सादृश्यगुरुत्वान्न तदवच्छेदकत्वमिति वाच्यम्, प्रमित्यन्तरास्वीकारेण सह लाघवात्। धर्मिकल्पनातो धर्मकल्पनाया लघीयस्त्वमिति न्यायात्। क्लृप्तकल्पनापेक्षया क्लृप्तं बलवदिति न्यायेन

शब्दस्यैवावच्छेदकत्वमिति मते गवयशब्दस्यैवावच्छेदकत्वसम्भवेन दोषलेशोऽपि नास्तीति दिक्।

18.5 किञ्च शक्तिग्राहकत्वेन यद्यप्युपमितेः प्रमाणान्तरत्वं स्वीक्रियते तर्हि तुल्ययुक्त्या

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।

इति गाथोक्तानां सर्वेषामपि तथावापोद्वापस्यापि पदे शक्ति-ग्राहकस्य प्रमाणान्तरत्वापत्तिः। उपमितावेव प्रमाणान्तरत्वम्, नान्येषामित्यत्र विनिगमकाभावात्। तंथा चत्वारि प्रमाणानीति भवत्सिद्धान्तहानिः। अथ तत्र प्रमाणान्तरत्वाभावे साधकं ब्रूषे तर्हि तदैवोपमानेऽपीति दिक्।

इति व्याख्यातमुपमानम्।

19. शब्दप्रमाणनिरूपणम्

19.1 अथ शब्दो निरूप्यते। आप्तवाक्यं शब्दः। आप्तश्च प्रकृत-वाक्यार्थगोचरयथार्थज्ञानवान्। पदज्ञानं करणं, पदार्थोपस्थितिर्व्यापारः। आकाङ्क्षायोग्यतासत्तितात्पर्यज्ञानानि कारणम्, फलं शाब्दबोधः। स्वरूपयोग्यत्वे सति अजनितान्वयबोधकत्वमाकाङ्क्षा। तेन घटः कर्मत्वमानयनं कृतिरित्यादौ नान्वयबोधः, स्वरूपायोग्यत्वात्[362]। अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र राज्ञः पुरुष इति नान्वयबोधः, पुत्रेण जनितान्वयबोधात्, बाधकप्रमाविरहायोग्यत्वात्। तेन वह्निना सिञ्चतीत्यादौ नान्वयबोधः, अयोग्यत्वात्। अव्यवधानेनान्वय-प्रतियोग्युपस्थितिरासत्तिः। तेन गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यत्र नान्वयबोधः। तत्तदर्थ-

---

362. *स्वरूपायोग्यत्वात्* इति उपलब्ध-क-पाठः

प्रतीतीच्छयोच्चरितत्वं तात्पर्यम्। तेन भोजनप्रकरणे सैन्धवमानयेत्युक्तेः अश्वानयनबोधो न भवति।

19.2 वृत्त्या विना शब्देनान्वयबोधस्तु न जन्यते। वृत्तिर्द्विविधा शक्तिर्लक्षणा च। शक्तिर्घटादिपदस्य घटादौ। लक्षणा यथा गङ्गायां घोषः प्रतिवसतीत्यन्वयबोधो भवति। गौणीवृत्तिरपि लक्षणैव। यथा सिंहो माणवकः। अत्र लक्षणाया सिंहादिसादृश्यं प्रतीयते। शक्तं पदं चतुर्विधम्। यौगिकं रूढं योगरूढं यौगिकरूढञ्च[363]। आद्यं पाचकादिपदं योगार्थेन पाककर्तरि शक्तम्। द्वितीयं विप्रादिपदं रूढिपरं ब्राह्मणवाचकम्। तृतीयं पङ्कजादिपदम्। योगरूढ्या पङ्कजनिकर्तृत्वेन पद्मत्वेन पद्मावाचकम्। चतुर्थमुद्भिदादिपदं यौगिकं तरुगुल्मादिवाचकं रूढं योगविशेषस्य। लक्षणा द्विविधा। जहत्स्वार्थाजहत्स्वार्था च। आद्या गङ्गायां घोष इत्यादौ। द्वितीया सर्वे क्षत्रिणो यान्तीत्यादौ। अत्र क्षत्रिणस्तदितरस्यापि गमनान्वयः इति तार्किकाः।

19.3 अथ शाब्दिकास्तु तत्तदर्थबोधकवाक्यज्ञानमेव शाब्दप्रमितिकरणम्। पदज्ञानस्य वाक्यज्ञानस्य वा शाब्दप्रमिति-करणत्वेऽगृहीतशक्तिकानामपि अर्थप्रत्ययापत्तिः। तदर्थमितरकारण-चक्रसमवहितकारणस्यैव फलोपधायकत्वेन केवलशब्दसत्त्वे शक्तिज्ञानरूपसहकारिविरहान्न तत्र फलोपधानमिति वाच्यमिति गौरवं स्पष्टमेव। एवञ्च वाक्यज्ञानस्य करणत्ववादिना वाक्ये शक्तिरवश्यं स्वीकार्या। शब्दो न प्रमाणान्तरमेव चार्वाकमतखण्डनावसरे एतद्वाक्यस्य शब्दद्वारकत्वेन प्रामाण्ये आगतं शब्दप्रामाण्यम् अप्रामाण्यगतं शब्दस्य। तस्माद् वाक्य एव शक्तिः।

---

363. *यौगिकरूत्वञ्च* इति पाठः उपलब्ध-क-पाठे नोपलभ्यते

19.4 किञ्च व्यवहाराच्छक्तिग्रह इति निर्विवादम्। स च वाक्ये एव न तु पदे। न च व्यवहाररूपमुख्यकारणबलाद् वाक्ये पूर्वं गृहीतापि शक्तिर्लाघवात् पदे गृह्यते। यथा चन्द्रतारादिष्वल्पता प्रत्यक्षापि शब्दजन्यमहत्त्वेन बाध्यत इति वाच्यम्, चन्द्रादिस्थत्वेन दूरत्वादिदोष-विशिष्टप्रत्यक्षस्य निर्दिष्टशब्दप्रमाणेन बाधसम्भवेऽपि निर्दिष्टस्य शक्तिग्रहं व्याकरणोपमानेति वृद्धगाथामध्ये[364]पठितस्य व्यवहारस्य शब्दप्रमाण-स्थलस्य शक्तिग्राहकस्य पूर्वोक्तशक्तिग्रहमित्यादिवृद्धगाथामध्ये[365]पठितेन पदे शक्तिग्राहकेण प्रामाणिकेन लाघवेन बाधायोगात्।

19.5 किञ्च व्यवहारस्य शक्तिग्राहकत्वमेवोच्छिद्येत। वस्तुतो लाघवमेवासिद्धम्, कल्पनागौरवप्रसङ्गात्। तथाहि पूर्वं प्रयोज्य-प्रयोजकवृद्धव्यवहारात् तटस्थेन सदनुमानप्रमाणगम्यस्य वाक्यशक्ति-ग्रहस्यावापोद्वापाभ्यां त्यागः पदकल्पनम्। शब्दप्रमाणगम्यस्य वाक्य-शक्तिग्राहकव्यवहारस्य त्यागः। वृद्धोक्तशक्तिग्राहकगाथानुक्ता-वापोद्वापस्य तत्कल्पनमिति। किञ्चैवं सति वाक्यार्थज्ञानपूर्वकत्वं पदज्ञानस्य स्यात्, न तु पदार्थज्ञानपूर्वकत्वं तस्य। तथा च सिद्धान्तहानिः। न च वाक्यानामनन्तत्वं, पदेऽपि तुल्यत्वात्।

19.5 एवञ्च धात्वादौ तिबादौ प्रकृतिप्रत्ययसमुदाये वस्नसादौ शक्तिग्राहकव्याकरणादीनां वाक्यार्थज्ञानोपायमात्रत्वम्। यथान्नमय-प्राणमयविज्ञानमय आनन्दमयेति पञ्चकोशानां ब्रह्मत्वप्रतिपादनम्, यथा वा स्थूलनक्षत्रस्यारुन्धतीत्वप्रतिपादनं, यथा वा रेखागवयप्रतिपादनम्, यथाक्रमं शुद्धब्रह्मसूक्ष्मारुन्धतीशुद्धगवयज्ञानोपायमात्रम्, तथा पदशक्ति-ज्ञानमपि वाक्यशक्तिज्ञानोपायमात्रं स्वकारण[366]चक्रसहितस्यैव व्यवहारस्य

---

364. *मध्यापठितस्य* इति उपलब्ध-क-पाठः

365. *मध्यापठितेन* इति उपलब्ध-क-पाठः

366. *स्वेतकरण* इति उपलब्ध-क-पाठः

शक्तिग्राहकत्वात्। किञ्च भवन्मतेऽपि अर्थशब्दस्य वृत्तित्वाद् वाक्ये वृत्त्यभावे तत्त्वमसीति वाक्यार्थावगमान्निःश्रेयसाधिगम इति सिद्धान्तो व्याहन्येत्। प्रकल्पितं चैतत् स्फोटचन्द्रिकायामिति दिक्।

20. शक्तिनिरूपणम्

20.1 ननु शब्दसहकारिग्रहविषया शक्तिः केचित्। सङ्केतजन्यग्रहे तत्तत्पदार्थतावच्छेदकाभावकूटवदभिधाना सेति[367] मीमांसकाः। नैयायिकास्तु अभिधाज्ञाने भवतामप्यपेक्षणीयत्वात् सङ्केत एवाभिधा, न तु पदार्थान्तरम्। सङ्केतश्चैतत्[368]पदजन्यत्वप्रकारतानिरूपितैतदर्थ-बोधविशेष्यताशालीश्वरेच्छा। न चेश्वरमविदुषां[369] मीमांसकानां कथमर्थ-प्रत्ययः। तेषामपि सङ्केतत्वप्रकारकज्ञानसत्त्वादित्यनेन मीमांसकमतं दूषितम्। अग्रे च ज्ञानं कृतिरिच्छा चेति विनिगमनाविरहादतिरिक्तैव शक्तिरिति तन्मतमङ्गीकृतम्। तत्र स्वमतत्यागपूर्वकं परमतस्वीकाररूपो दोषः। जानाति इच्छति यतते इति क्रमे पूर्वोपस्थितत्वरूपज्ञानस्य विनिगमकस्य सत्त्वात् तद्विरहोऽप्ययुक्तः। अत एवेश्वरज्ञानं शक्तिरिति वर्द्धमानोपाध्यायाः।

20.2 **शाब्दिकास्तु** शब्दार्थयोरनादिः सम्बन्ध एव शक्तिः। अथवा बोधकत्वत्वमेव शक्तिः। तच्चार्थबोधके जननसामर्थ्यं, तच्च ज्ञातमुपयुज्यते, न तु स्वरूपसत्[370] । तज्ज्ञानं च व्यवहारात्। स च प्रयोजकवृद्धस्य प्रयोज्यवृद्धं प्रति कार्यान्वितसाध्वसाधुपदसमूह-रूपवाक्यजन्यार्थज्ञानजन्यः। तच्चानाकलितपदविभागस्य घटमानयेति

367. *चेतत्* इति उपलब्ध-क-पाठः

368. *मेति* इति उपलब्ध-क-पाठः

369. *चेश्वरसरिदुषां* इति उपलब्ध-क-पाठः

370. *स्वरूपमत्* इति उपलब्ध-क-पाठः

वाक्यस्य कार्य्यताविशिष्टज्ञानजनकत्वम्। कार्यान्वितं शक्त्यैव निर्वहतीति वाक्ये एव शक्तिः। एवञ्च शक्यस्यैव शाब्दविषयत्वमिति नियमः। एवञ्च वाक्यार्थप्रकारतयैव भासते। न चैवं लक्षणोच्छेदापत्तिः, इष्टापत्तेः[371]। यथा सर्वालङ्कारिकानुभवसिद्धा व्यञ्जना[372] लाघवादतिरिक्ता न स्वीक्रियते तथा मयापि लाघवाल्लक्षणाप्यतिरिक्ता न स्वीक्रियते। पदशक्तिवादिना तु पूर्वं वाक्ये शक्तिग्रहस्तत्त्यागः, पदे कल्पनं, तस्य प्रकारतयैव भानम्। वाक्यार्थस्य शक्तिसंसर्गतया आकाङ्क्षा-योग्यतासत्तिर्लक्षणा चेति कल्पनागौरवात् पदे लाघवाच्छक्तिरिति रिक्तं वचः। एवञ्च वाक्यार्थेऽभिधारूपा शक्तिरिति भट्टमतस्य लक्षणोच्छेदापत्तिरूपाद् वृत्त्या विना शब्देनान्वयबोधस्तु न जन्यते दूषणमयुक्तमिति दिक्।

20.3 भावनान्वितपदानामभिधेति वदत्प्राभाकरोऽपि अस्माक-मनुकूलः। एतावान् परं विशेषः। तैः पदे, अस्माभिस्तु वाक्ये। क्रियान्वयं विना केवलं पदयोज्यमेवेति सर्वेषां समानमेव। एवञ्च बुद्धै[373]र्वेदस्या-प्रामाण्यमुच्यते। प्राभाकरैस्तु यत्र लिङ्लोट्तव्यदादि[374] भावनावाचक-पदसमभिव्याहारो नास्ति तेषामप्रामाण्यमत एव बुद्धैः[375] सदृशत्वेन बुद्ध-बन्धुत्वमिति मिश्रादितार्किकोपहासस्तन्मताज्ञानात्। तथा हि यथा तार्किकैः विशेष[376] देवदत्तादि[377]प्रथमान्तपदसमभिव्याहाराभावे पचतीत्याख्यातस्य

---

371. *इष्टापत्तिः* इति उपलब्ध-क-पाठः
372. *व्यञ्जनयैव* इति उपलब्ध-क-पाठः
373. *बुद्धेः* इति उपलब्ध-क-पाठः
374. *तव्यनेडादि* इति उपलब्ध-क-पाठः
375. *बुद्धेः* इति उपलब्ध-क-पाठः
376. *विशेषा* इति उपलब्ध-क-पाठः
377. *देवदत्तादि* इति उपलब्ध-क-पाठः

मूकत्वम्। तथा तैरपि[378] विशेष्य[379]भावनावाचकपदसमभिव्याहाराभावे[380] विशेषणपदानां मूकत्वम्। अत एव भावनावाचकपदसमभिव्याहार-रहितानामर्थवादिनां सोमेन यजेतेत्यादिविधिवाक्यगतं कथं तदभावाकांक्षा-पूरकत्वेन तदैकवाक्यत्वात् प्रामाण्यम्।

20.4 शक्तं पदम् । तच्चतुर्विधमिति वदद्भिरवश्यं वाक्ये शक्तिः स्वीकार्या, अन्यथासङ्गतिः। तथाहि यथा शाब्दिकैः सुप्तिङन्तमित्यनेन सुप्तिङन्तमुद्दिश्य पदसञ्ज्ञा विधीयते तथा तार्किकैः शक्तत्वमुद्दिश्य पदत्वं विधीयते। तत्र किं व्यवहारेण गृहीतशक्तिकमुत व्याकरणादिना? नाद्यः, तेन वाक्ये एव शक्तिग्रहात् तस्यैव पद्यतेऽर्थोऽनेनेति व्युत्पत्त्या पदत्वापत्तिः। नान्त्यः, व्याकरणेन पच् अक इत्यनयोः प्रत्येकं शक्तिग्रहेण शक्तपदत्वेऽपि योगाभावाद् यौगिकपदत्वाभावः। एवं पाचक इति विशिष्टस्य यौगिकत्वेऽपि शक्तपदत्वाभावाद् यौगिकः शक्तपदत्वाभावः। एवञ्च प्रत्येकं शक्तिग्रहे विशेषणाभावप्रयुक्तविशिष्टाभावात् समुदाये विशेष्याभावप्रयुक्तविशिष्टाभावाद् यौगिकशक्तं पदमिति युक्तिविरुद्धमिति दिक्।

20.5 बोधकत्वरूपा शक्तिरसाधुवाक्येऽपि, तस्मादपि बोधानुभवात्। न च साधुतापत्तिः, न हि शक्तिमत्त्वं साधुत्वं, पुण्यजनकतावच्छेदको जातिविशेषस्साधुत्वम्। याज्ञे कर्मणि नानृतं वदेदिति निषेधात् प्रत्यवायजनकतावच्छेदको जातिविशेषोऽसाधुत्वम्। साधुत्वज्ञानञ्च शाब्दबोधकारणं न चासाधुत्वनिश्चयप्रतिबन्धकः। शक्तिभ्रमाद् बोधस्साधुशब्दस्मरणाद् वेति न कल्प्यमिति लाघवम्।

---

378. *तथा तैरपि* इति उपलब्ध-क-पाठः

379. *विशेष्यता* इति उपलब्ध-क-पाठः

380. *समभिव्याहाराभावा* इति उपलब्ध-क-पाठः

एवमेककर्तृका वह्निकरणिका सेचनक्रियेत्यर्थः। वह्निना सिञ्चतीति वाक्यं शक्तमेव तस्मात्तद्बोधकानुभवात्। न च बाधकप्रमारूपयोग्यता-रूपकारणविरहादयोग्यतारूपबाधकसत्त्वाच्च न ततोऽन्वयबोध इति वाच्यम्, तयोः शाब्दबोधं प्रति कारणत्वबाधकत्वानङ्गीकारात्। अन्यथा समुद्रः .... [381]इत्यादौ भाष्यकाराद्यभ्युपेतशाब्दबोधो न स्यात्। नाहं बृहस्पतिर्नाहं रजीपुत्र इति बाधज्ञाने सत्यपि त्वं रजीपुत्रस्त्वं बृहस्पतिरिति वाक्यश्रवणानन्तरं हर्षविषादा ......[382] बोधस्यावश्यकत्वात्।

20.6 किञ्च गङ्गाघोषाधिकरणन्नेति बाधकनिश्चये गङ्गायां घोष इत्यतोऽपि बोधो न स्यात्। न च लक्षणया बोधः। सा हि बोधोत्तर-मन्वयानुपपत्त्या, न तु ततः प्रागिति सर्वोपपप्लव एव स्यात्। गम्भीरायां नद्यां घोष इत्यादिवाक्यं गभीरनदीसम्बन्धितीराधिकरणकघोषे शक्तम्। नातोऽनयोरन्यतरस्य चोभयोर्वा तीरे लक्षणा। अन्यतरस्य तस्य वा विशिष्टे इति अनेककुकल्पनाप्रसङ्गः।

20.7 यथा परमाणुद्वयसंयोगाद् द्व्यणुकं द्व्यणुकत्रयसंयोगात् त्रसरेणुस्ततः कपालस्तस्माद् घटस्तस्माज्जलमानयनरूपं कार्यम् इति भवदभिहिता प्रक्रिया तथा **शाब्दिकानामपि**। ध्वनिभिर्वर्णाभिव्यक्तिः, तैः प्रकृतिप्रत्ययादिकल्पना, तया सुप्तिङन्तं पदमिति, पदसञ्ज्ञकैश्च वाक्यम्। तच्च वर्णपदातिरिक्तम्। तथा चोक्तं -

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन।।
उपायाः शिक्षमाणानां बालानामुपलालनाः।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते।।"

---

381. *कुण्डिकाविध्योर्घद्धित्तकमित्यादौ* उपलब्ध-क-पाठः

382. उपलब्ध-क-पाठः अस्पष्टः

इति च। न चातिरिक्ते मानाभावः, विजातीयसंयोगविशिष्ट-तन्तुसमूहेनैव पटव्यवहारसिद्धौ भवदभिमतपटवदतिरिक्तसिद्धेः। विस्तरस्तु स्फोटचन्द्रिकायामनुसन्धेयः।

इति शक्ति-निरूपणम्।

21. लक्षणानिरूपणम्

21.1 स्वशक्यसम्बन्धो लक्षणा। स्वं गङ्गापदं तच्छक्यं प्रवाहः। तत्सम्बन्धस्तीरे तथा च गङ्गायां घोष इति जहल्लक्षणा इत्याहुस्तार्किकाः। शाब्दिकास्तु नेयं जहल्लक्षणा किन्त्वजहत्स्वार्था। गङ्गासम्बन्धितीर इति बोधात्। तथा गङ्गासम्बन्धितीरत्वं लक्ष्यतावच्छेदकम्। न च गुरुधर्मस्या-वच्छेदकत्वं नास्तीति वाच्यम्, तत्र वृत्तिर्नास्तीति तदर्थात्। अन्यथा तीरत्वस्य लक्ष्यतावच्छेदकत्वे यत्किञ्चित् तीरोपस्थितौ विजातीयशैत्य-पावनत्वे प्रतीतिर्न स्यात्। तथा राजपुरुष इत्यादौ राजपुरुषत्वं, न तु सम्बन्धित्वम्। एवञ्च लक्ष्यतावच्छेदककोटौ शक्यस्यापि निवेशाद-जहत्स्वार्थतैव युक्ता। तदुक्तं- "जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी"। यत्र रूढिः प्रसिद्धिर्योगविरोधिनी तत्रैव जहत्स्वार्था। यथा कर्मणि कुशल इत्यादौ। दक्षे रूढिः प्रसिद्धिः। कुशान् लातीति कुशादानकर्तुर्योगार्थस्य विरोधिनी कुशादानकर्तृत्वस्य बाधादिति कुशलपदस्य दक्षे लक्षणा। एवञ्च रूढिलक्षणायामेव जहत्स्वार्था प्रयोजनवत्यां तु अजहत्स्वार्थैवेति विवेकः। राजपुरुष इत्यादौ तु "समर्थः पदविधिः" इत्यनुशासनिकी शक्तिरेव। न चानन्यलभ्यो हि शब्दार्थ इति न्यायविरोधः, तस्य लक्षणया लभ्ये वृत्तिकल्पनमन्याय्यमिति तदर्थः। न च लक्षणोच्छेदापत्तिः, व्यञ्जनाव-दिष्टापत्तेः।

21.2 एवञ्च समाससामान्ये सर्वत्र शक्तिरेव, लाघवात्। तथा हि चित्रगुरित्यत्र चित्रपदं चित्रस्वामिलक्षकं गोपदं वा। तथा च चित्रगुस्वामी गौरिति बोधापत्तिः, गोस्वामी चित्र इति वा। यदि चित्रपदसमभिव्याहृतगोपदं चित्रगोस्वामिलक्षकम्, एवञ्च चित्रगुं पश्येत्यत्र द्वितीयार्थकर्मत्वस्य

गोपदार्थेऽन्वयो न स्यात्। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थ-बोधकत्वनियमात्। प्राप्तोदको ग्राम इत्यत्र वाक्ये ग्रामकर्मकप्राप्तिकर्तृ उदकमिति बोधः। समासे तु उदककर्तृकप्राप्तिकर्मीभूतो ग्राम इति बोधः। आरूढवानरोऽयमिति वाक्ये आङ्पूर्वकवहधातोरूर्ध्वदेशावच्छिन्न-संयोगानुकूलक्रिया, क्तप्रत्ययस्य आश्रयः, द्वितीयाया आधेयत्वमर्थः। वृक्षवृत्ति ऊर्ध्वदेशावच्छिन्नसंयोगानुकूलक्रियाश्रयो वानर इत्यन्वयबोधः। समासे तु आरोहणकर्तृवानरसम्बन्धी वृक्ष इत्यन्वयधीः। एवञ्च चैत्रेण दत्तधन इत्यत्र चैत्रेण दत्तं धनं यस्मै इति चैत्रकर्तृकयत्सम्प्रदानकदान-कर्मधनमित्यन्वयबोधः। समासे तु चैत्रकर्तृकधनसम्बन्धीत्यन्वयधीः। सम्बन्धः स्वकर्मकदानत्वम्। अत्र समानाधिकरणः। चक्रपाणिरित्यादौ व्यधिकरणः। एवञ्च लक्षणास्वीकारे तत्स्वीकारः। अनेकव्युत्पत्ति-भङ्गश्चेति स्पष्टमेव गौरवं सुधियाम्।

21.3 किञ्च राज्ञः पुरुषो भार्या इत्यत्र कस्मिन् पुरुषे एकत्र द्वयमिति रीत्योभयसम्बन्धो वाक्ये, न राजपुरुष इति समासे। तथा च वषट्कर्तुः प्रथमभक्ष इत्यत्र न प्राथम्यानुवादेन भक्षविधानमेकशक्तिविषयाणामेक[383] रूपेणैवान्वयस्य व्युत्पन्नत्वात्। एवञ्चाङ्गैः स्विष्टिकृतं यजतीत्यत्रानुवादेन न त्रित्वविधानं, किन्तूभयत्रापि विशिष्टविधानम्। इदञ्च तत्पुरुषबहुव्रीह्यादौ शक्तिस्वीकारे एव घटते शक्त्यपेक्षया लक्षणया शक्तिज्ञानतात्पर्य्या-नुपपत्तिज्ञानपूर्वकत्वेन सुतरां गुरुत्वाच्च। न चानन्येति न्यायविरोधः, संसर्गादिलभ्ये वृत्तिकल्पनमन्याय्यमिति तदर्थात्। किञ्च स्वायत्ते शब्दप्रयोगे लाक्षणिकशब्दप्रयोगेऽस्ति बीजाकाङ्क्षा गङ्गायां घोष इत्यादौ शैत्यपावनत्वादिप्रतीतिर्बीजम्। न तथा राजपुरुष इत्यादौ। ननु यदि तत्पुरुषादौ शक्तिः कथं निषादस्थपतिं याजयेदित्यत्र तत्पुरुषात् कर्मधारयो लघीयानिति कर्मधारयसिद्धिः। उभयत्रापि शक्तिसत्त्वेन तुल्यत्वादिति चेत् सत्यं, नात्र

383. *विषयामेक* इति उपलब्ध-क-पाठः

शक्तिलक्षणाकृतगौरवालाघवं, किन्तु तत्पुरुषकर्मधारयबहुव्रीहिभेदेन नानार्थत्वात् तत्र तात्पर्यग्रहस्य हेतुत्वात् किं तात्पर्यमिति सन्देहे सम्भवति सामानाधिकरण्ये वैयधिकरणमन्याय्यमिति कर्मधारयलाभः। अथवा लिङ्गदर्शनाच्चैतत्सूत्रे कूटदक्षिणा कूटं हि निषादानामेवोपकारकमिति लिङ्गोपन्यासात् तात्पर्यनिर्णयः। अत एव सुरपतिरित्यादौ तत्पुरुषो, न तु कर्मधारयः। एवञ्च कर्मधारयो लघीयानिति तार्किकोक्तं निर्मूलम्।

22. वाक्यार्थबोधनिरूपणम्

22.1 अथ वाक्यार्थबोधस्तार्किकाणाम्। देवदत्तो ग्रामं गच्छतीत्यादौ ग्रामकर्मकगमनानुकूलवर्तमानकृतिमान् देवदत्त इति बोधः। द्वितीयाया अर्थः कर्मत्वं धातोर्गमनम् अनुकूलं संसर्गमर्यादया लभ्यम्। लटो वर्तमानत्वम्, आख्यातस्य कृतिरर्थः। तत्संसर्गः संसर्गमर्यादया लभ्यः। यत्र कर्तरि कृतेर्बाधस्तत्राख्यातस्य व्यापारादौ लक्षणा। यथा रथो गच्छति इत्यादौ गमनजनकवर्तमानव्यापारवान्। अथ देवदत्तेन गम्यते ग्राम इत्यत्र देवदत्तवृत्तिकृतिजन्यगमनजन्यफलशाली ग्रामः। तृतीयार्थः कृतिः। फलं कर्म आत्मनेपदार्थः। वृत्तित्वं जन्यत्वञ्च संसर्गः। भावे तु देवदत्तेन सुप्यते इत्यत्र देवदत्तवृत्तिकृतिजन्यः स्वाप इति।

22.2 अत्र **शाब्दिकाः** वाक्यं नाम एकतिङन्तार्थमुख्यविशेष्यकम्। यथा देवदत्तो ग्रामं गच्छतीत्यत्र एकदेवदत्ताभिन्नाश्रयिका ग्रामवृत्ति-संयोगानुकूला क्रियेति। अत्र आश्रय आख्यातार्थः। आश्रयत्वमखण्डम-वच्छेदकम्। फलं व्यापारश्च धात्वर्थः। अभेदावृत्तित्वमनुकूलत्वं च संसर्गः। न चात्र क्रियाप्रधाने मानाभावः। क्रियाप्रधानमाख्यातमिति यास्कवचनस्यैव मानत्वात्। न च प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानमिति नियमभङ्गापत्तिः। पचतिकल्पमित्यादौ व्यभिचरितत्वेन तस्यानाश्रयणात्। कर्त्राख्यातवत् कर्माख्याते देवदत्तेन ग्रामो गम्यते इत्यादौ एकदेवदत्ताश्रयिका

ग्रामकर्म्मिका गमनक्रियेति बोधः। फलव्यापारयोर्धातुलभ्यत्वादाश्रयमात्रं तृतीयाद्वितीयार्थः। न चानयोः पर्य्यायतापत्तिः फलव्यापारयोर्धातुर्निरूपकयोर्भेदेन फलतीति[384] शाब्दबोधे वैलक्षण्यात्। एवञ्चैकदेवदत्ताश्रयकगमनजन्यग्रामवृत्तिसंयोग इति फलविशेष्यको बोध इति केषाञ्चिदुक्तिरयुक्ता, यास्कवचनविरोधात्।

22.3 एवञ्च प्रथमान्तविशेष्यको बोध इत्यपि न, मानाभावात् "देवदत्ताः पचन्ति भवन्ति" इत्यादि प्रयोगाणामसाधुत्वप्रसङ्गाच्च। देवदत्तेन सुप्यते इत्यत्र एकदेवदत्ताश्रयिका वर्तमाना शयनक्रियेति बोधः। एवञ्च भावकर्मकर्तृषु सर्वत्रैकरूपेणैव बोध इति लाघवम्। तार्किकमते क्वचित् प्रथमान्तविशेष्यकः क्वचित् क्रियाविशेष्यक इति गौरवम्। मीमांसकादीनामपि क्रियाविशेष्यकत्वमेव सम्मतम्। अर्थैकत्वादेकं वाक्यमिति एकवाक्यमिति विशेष्यभूतभावनैकत्वादित्येकैकवाक्यतालक्षणमपि अस्मदनुकूलमेव। न तु पदसमूहो वाक्यमिति। ओदनं पच, तव भविष्यतीत्यादावेकवाक्यतापत्तेः। न च इष्टापत्तिः, ओदनं पच तव भविष्यतीति प्रयोगापत्तेः। यदपि धातुलोपमजानतो व्यतिसे इत्यत्रार्थप्रत्ययाभाव इत्यपि न युक्तिमत्। राजपुरुष इत्यादौ षष्ठीलोपमजानतोऽपि लक्षणया बोधवत् प्रकृतेऽपि सम्भवात्। यत्तु आख्यातस्य यत्न एव शक्यः, यत्नार्थककरोतिना विवरणादित्युक्तं, तदपि न सम्यक्। न त्वाख्यातत्वावच्छेदेन यत्नः शक्यः, कर्माभावाख्यातयोरभावात्। विशेषबोधनाय सामान्यशब्दप्रयोगस्यान्याय्यत्वाच्च। न हि गोकर्मकेच्छया द्रव्यमानयेति प्रयुञ्जन्ते वृद्धाः। करोतेर्यत्नार्थकत्वमित्यत्र यत्नशब्देन किं गुणो विवक्षित उत क्रिया? नाद्यः क्रियावाचित्वाभावेन धातुत्वानापत्तेः, नान्त्यः यत्नो गुण इति भवत्सिद्धान्तहान्यापत्तेः। किञ्च पचतीति विवरणे आख्यातस्य कृतिवाचकत्वाद् विक्रियमाणे पाचक इत्यत्रापि कृतिवाच्यत्वापत्तेः।

---

384. *फलीति* उपलब्ध-क-पाठः

विवरणविव्रियमाणयोः समानार्थत्वनियमात्। न च लाघवात् कृतिवाचकत्वम्, लाघवस्यैवासिद्धेः। तथा हि तव मते क्वचित् कृतित्वं क्वचित् फलत्वं क्वचिद् व्यापारत्वं मन्मते तु कर्मकर्त्राख्यातस्याश्रयत्वमेव।

22.4 किञ्चाख्यातार्थसङ्ख्याप्रकारकबोधश्चेति प्रथमान्तपदजन्योपस्थितिः कारणमिति पदद्वयघटितकार्य्यकारणभावः। मन्मते तु तादृशबोधे आख्यातजन्योपस्थितिः कारणमिति लघुभूतः। किञ्च एको वृक्षः पञ्च नौका भवन्तीत्यत्र किं प्रकृतिभूते वृक्षे आख्यातोपात्तसङ्ख्यान्वयः उत विकृतिभूतनौकायाम्? नाद्यः, वृक्षस्य भवनाश्रयत्वाभावेनाख्यातार्थानन्वयाभावात्। तत्र सङ्ख्यान्वयस्य वक्तुमशक्यत्वात्। आख्यातार्थान्वयिन्येव सङ्ख्यान्वयनियमात्। नान्त्यः, गृह्णातिवाचकः सङ्ख्याप्रकृतिर्विकृतेर्न हीति स्वसिद्धान्तभङ्गापत्तेः। किञ्च काष्ठानि भस्मराशिः क्रियत इत्यत्राख्यातस्याश्रये लक्षणायामपि करोतेर्यत्नार्थकत्वाद् विषयतोभयत्रान्वयसम्भवेन प्रकृतिगतमेव वचनं स्यात्। गृह्णातीति वचनात्, न चेष्टापत्तिः, सुवर्णः पिण्डः खदिराङ्गारसदृशे कुण्डले भवत इति भाष्यविरोधात्। मद्भवसि त्वं, त्वद्भवाम्यहम् इत्यादीष्टपुरुषवचनव्यवस्था[385] न प्रकाश्यते। तत्समर्थनेऽनेककल्पनाश्रयणे गौरवप्रसङ्गः। कर्तृपदस्याख्याते कृतिपरत्वं, कृदादौ कर्तृपरत्वम्। तत्रानेककृतौ शक्यतावच्छेदकत्वमाख्याते क्वचित् कृतित्वं क्वचिदाश्रयत्वमिति महद् गौरवम्। कर्तृवाचकत्वे तु सर्वत्राश्रयत्वमेव। व्यापाराश्रयस्यैव कर्तृत्वादिति महल्लाघवम्। किञ्च गृह्णातीतिवचनं च्वन्तविषयं सङ्घीभवन्ति ब्राह्मणा इत्यादौ सङ्कोचे मानं तु पूर्वोक्तसुवर्णपिण्डे भाष्यप्रयोग एव।

---

385. *व्यवस्थां* इति उपलब्ध-क-पाठः

23. लकारार्थनिरूपणम्

23.1 अथ लडादीनामर्थो निरूप्यते। देवदत्तस्तण्डुलं पचतीत्यत्रैक-देवदत्ताश्रयिकतण्डुलवृत्तिविक्लितिजनकवर्तमानक्रियेति बोधः। मीमांसकानामप्येवमेव। परन्तु भावना प्रत्ययवाच्येति विशेषः। आश्रयस्तु लक्षणया आक्षेपाद् वा लभ्यः। तत्र प्रथमे युगपद् वृत्तिद्वयविनाशो दोषः। द्वितीये शाब्दे एकत्वान्वयः। किञ्च भावनायाः प्रत्ययवाच्यत्वे धातोस्तदस्ति न वा। आद्ये व्यापारद्वयबोधापत्तिः। द्वितीयेऽक्रियावाचित्वाद् धातुत्वानापत्तिः। यदि तु भावनाशब्देन कृतिरित्युच्यते तदा पूर्वोक्त एव दोषः।

23.2 प्रकृतमनुसरामः। वर्तमानत्वं लटोऽर्थः। तच्च प्रारब्धा-परिसमाप्तक्रियोपलक्षितत्वम्। भूतभविष्यद्भिन्नत्वं तच्च व्यापारे विशेषणम्। यजति स्म युधिष्ठिर इत्यादौ युधिष्ठिरकर्तृका देवपूजनानुकूला भूतानद्यतनपरोक्षा क्रियेति बोधः। अत्र भूतानद्यतनपरोक्षत्वं लडर्थः, लटः स्म इत्यनुशासनात्। इयाजेत्यर्थः। एवं स्म पिता ब्रवीदित्यत्र भूतानद्यतनं लङर्थः। अब्रवीदित्यर्थः। पितृकर्तृका भूतानद्यतनाव्यक्तवचनानुकूला क्रियेति बोधः, अपरोक्षे चेत्यनुशासनात्। ननु पदसमभिव्याहारे पृष्टस्य प्रतिवचनेऽकार्षीः किं नु करोमि इत्यादौ भूते लट् अकार्षमित्यर्थः। ननु पदयोरसमभिव्याहारे पृष्टस्य प्रतिवचनेऽकार्षीः किम्? न करोमि नाकर्षम्, अहन्नु करोम्यहन्नु [386]अकार्षमित्यादौ भूतमात्रं लङर्थः। अस्मत्कर्तृका भूतप्रतिवचनानुकूला क्रियेति बोधः। अस्मत्पदासमभिव्याहृतपुराशब्दयोगे वसन्तीह पुरा छात्रा इत्यत्र भूतानद्यतना छात्रकर्तृका वासक्रियेति बोधः। अवात्सुः, अवसन्, ऊषुर्वा। अत्र भूतानद्यतनत्वं लङर्थः। पुरि लुङि स्म

---

386. उपलब्ध-क-पाठः अस्पष्टः

इत्यनुशासनात्। निश्चयद्योतकयावत्पुरानिपातसमभिव्याहारे भविष्यत्काले यावद् भुङ्क्ते पुरा भुङ्क्ते इत्यादौ देवदत्तकर्तृका भविष्यत्कालिकी निश्चितक्रियेति बोधः। निश्चितं भोक्ष्यत इत्यर्थः।

23.3 भविष्यत्कालो लृडर्थः। कदा कर्हीत्यनयोः समभिव्याहारे कदा कर्हि वा भुङ्क्ते इत्यत्राद्यतनानद्यतनभविष्यति लट्। भोक्ष्यते भोक्ता वेत्यर्थः। देवदत्तकर्तृकाद्यतनानद्यतनभविष्यत्कालिकी भुजिक्रिया कालविशेषप्रश्नविषयेति बोधः। "विभाषा कदाकर्ह्योः" इत्यनुशासनात्। लब्धुमिच्छायां किंवृत्ते कं कतरं कतमं वा भोजयसि इत्यत्र भविष्यति लट्। भोजयिष्यसि भोजयितासि वेत्यर्थः। देवदत्तकर्तृका भविष्यद्-विषयिणी [387]अनियतकर्मिका भोजनविषयिणी प्रवर्तनेति बोधः। किं वृत्तेर्लिप्सायाम् इत्यनुशासनात् लब्धुमिष्यमाणोऽन्नादिना स्वर्गादिसिद्धौ गम्यमानायां योऽन्नं ददाति स स्वर्गलोकं यातीत्यादौ भविष्यति लट्। दास्यति दाता वेत्यर्थः। यास्यति याता वेत्यर्थः, "लिप्स्यमानसिद्धौ च" इत्यनुशासनात्। कृष्णश्चेद् भुङ्क्ते त्वं गाश्चारय। भविष्यति लट्। मुहूर्त्तादुपरि उपाध्यायश्चेदागच्छति अथ त्वं छन्दोऽधीष्व। अत्र भविष्यति लट्। कदा गतोऽसि भूतकाले प्रश्नः। अयमागच्छामि इत्यस्य लट् भूतकालत्वद्योतनाय। अयमिति प्रयोगस्तु वर्तमानसामीप्यभूतवर्तमानद्योतनाय। अयमागममित्यर्थः। कदा गमिष्यसि? एष गच्छामि। भविष्यति लट्। एष गतिप्रयोगस्तु वर्तमान-सामीप्यभविष्यत्कालद्योतनाय। देवश्चेद् वर्षति धान्यं वप्स्यामः। यथाक्रमं वर्षिष्यति वप्स्याम इत्यर्थः।

23.4 भूतभविष्यद्वर्तमानकालास्सन्तीत्यत्र भूतभविष्यतोः वर्तमानसत्ताभावेऽपि बौद्धं वर्तमानत्वम्। यद्वा देवदत्तादिप्रथमान्त-पदासमभिव्याहृतपचतीत्यादावाख्यातोपात्तसंख्याया अनन्वितवर्तमान-

---

387. *अनितकर्मिका* इति उपलब्ध-क-पाठः

कालोऽनन्वित एव। यद्वैकप्रवर्तमानत्वस्यान्वयः। अन्यत्र धात्वर्थस्येति विवेकः। यद्वासति विशेषणेतिन्यायाद् विशेष्ये बाधाद् विशेषणे शिखी ध्वस्त इति विशेषणे उपसङ्क्रान्तिवद् विशेष्ये उपसङ्क्रान्तिर्भवति। यद्वा बाधकालीनमिच्छाजन्यं ज्ञानमाहार्यारोप इत्येवंरूपाहार्यारोपेण भविष्यति वर्तमानत्वान्वयः।

23.5 एवञ्च वर्तमानत्वमेव लडर्थ इति तार्किकोक्तमपास्तम्। एवं भविष्यत्वं लृटोऽर्थः। तच्च वर्तमानप्रागभाव[388]प्रतियोग्युत्पत्तिकत्वम्। तेन गमिष्यतीत्यत्र विद्यमानप्रागभावप्रतियोग्युत्पत्तिकगमनानुकूल-कृतिमानित्यर्थः। लुटोऽर्थः अनद्यतनत्वमपि, उत्पत्तिभूतत्वञ्च। भूतत्वमतीतत्वं तच्चोत्पत्तावन्वेति। तथा च विद्यमानप्रतियोग्युत्पत्तिकत्वं न लब्धम्। लिटोऽपि परोक्षत्वमतीतत्वञ्चार्थः। विधिर्लिङोऽर्थः कृतिसाध्यत्वे सति बलवदनिष्टाजनकेष्टसाधनत्वम्। स्वर्गकामो यजेतेत्यादौ कृतिसाध्यबलवदनिष्टाजनकेष्टसाधनयाजकः स्वर्गकाम इत्यर्थः। आशीर्लिङो लोटोऽर्थः वस्तुरिच्छाविषयत्वम्। तेन घटमानयेत्यत्र घटकर्मकमदिच्छाविषय आनयनानुकूलकृतिमांस्त्वमित्यन्वयः।

23.6 व्याप्यक्रियया[389] व्यापकक्रियाया[390] अपादानं लृङोऽर्थः। तात्पर्यवशात् क्वचित् भूतत्वं क्वचिद् भविष्यत्वं लृङा बोध्यत इत्यपि। स्मरसि कृष्ण गोकुले वत्स्याम इत्यत्र भूतानद्यतनमपि लृटो दर्शनात्। गोकुलाधिकरणकास्मत्कर्तृकभूतानद्यतनवासकर्मकं कृष्णसम्बोध्यकं स्मरणमित्यर्थः।

---

388. *प्रागभावं* इति उपलब्ध-क-पाठः

389. *व्याप्यक्रिया* इति उपलब्ध-क-पाठः

390. *व्यापकक्रिया* इति उपलब्ध-क-पाठः

24. सनाद्यर्थनिरूपणम्

24.1 सनः कर्तुरिच्छार्थः। सनुत्तराख्यातस्याश्रयत्वे लक्षणा, सविषयार्थकप्रकृतिकाख्यातस्य लक्षणायाः आश्रयत्वे घटं जनातीत्यादौ क्लृप्तवात्। कर्तृप्रत्ययस्थले सन्प्रत्ययार्थेच्छायाः धात्वर्थविशेष्यतया भानम्। कर्मप्रत्ययस्थले तु तस्या धात्वर्थविशेषणतया भानम्। अत एव चिकीर्ष्यते पाक इत्यादौ पाकरूपे कृतिकर्मणि आख्यातः सङ्गच्छते। तत्रापि वर्तमानत्वादेरिच्छायामन्वयः। प्रकृत्यर्थैकदेशेऽपि नीलतरो घट इत्यादिस्थले नीलरूपादौ तरबाद्यर्थातिशयादित्याहुः, तन्न, प्रत्ययार्थ-प्रधानमिति नियमभङ्गापत्तेः, व्युत्पत्तिद्वयकल्पनागौरवाच्च। तस्माद् धात्वर्थ-विशेषितैवेच्छा सन्प्रत्ययार्थः। चिकीर्ष्यते पाक इत्यादौ तु अनुकूलक्रिया-विषयिणीच्छा सन्नन्तधात्वर्थः। अन्यमते[391] तु कृतिविषयिणीच्छा उभयथापि जिज्ञास्यते। घट इत्यादौ तव मते इच्छाविषयज्ञानविषयघटस्य धात्वर्थकर्मत्वेन तत्राख्यातवन्मन्मतेऽपि पाकस्य धात्वर्थकर्मत्वेन तत्राख्यातसम्भवात्। एकदेशेऽपि कारकान्वयस्य व्युत्पन्नत्वात्।

24.2 एवं क्यजादीनामपि इच्छैवार्थः। यतु सुबन्तोत्तरेच्छार्थ-विहितक्यच्काम्यजन्तस्य धातोरिच्छार्थकतया सन्प्रत्ययाविशेषेऽपि सनन्तधातुवन्न सकर्मकत्वम्। तदन्तर्गतप्रातिपदिकस्यैव कर्मबोधकतया इच्छायाः कर्माकाङ्क्षाया विरहादित्याहुर्गदाधरप्रभृतयः, तन्न, क्यजन्ता-कर्मकतासाधकहेतोः सन्नन्तेऽपि सत्त्वेनाकर्मकतापत्तेः। एतावान् परं विशेषः तत्र प्रातिपदिकस्य कर्मबोधकत्वं सन्नन्तधातोरिति। किञ्च शिशयिषतीत्यादिसन्नन्तेऽपि अकर्मकत्वदर्शनेन ओदनस्य पाकीयती-त्यादिक्यजन्तेऽपि सकर्मकत्वदर्शनेन वाकर्मकत्वसाधकहेतोर-प्रतिपादकत्वात्[392]।

---

391. *अन्यतमे* इति उपलब्ध-क-पाठः

392. *अप्रातिपदिकत्वात्* इति उपलब्ध-क-पाठः

24.3 यङोऽर्थः पौनः पुन्यत्वञ्च। तदानीन्तनप्रकृत्यर्थसजातीयक्रियान्तरध्वंसकालीनत्वे सति वर्तमानत्वादिकृतिविषयत्वम्। पापच्यत इत्यादौ तादृशकालीनत्वमेव यङा प्रत्याय्यते। आख्यातस्य चरमदलवाचकत्वात्। न विशिष्टवाचकत्वं यङः। तदानीन्तनत्वं च स्थूलकालमादायेति तार्किकाः।

24.4 अत्र **शाब्दिकाः**। पौनःपुन्यबाहुल्यकौटिल्यगर्हादीनि[393] यङादिद्योत्यानि, पापच्यत इत्यादौ प्रकरणादिवशेन तथा प्रतीतेः, शक्तिग्राहकव्याकरणस्य सत्त्वाच्च। तथा च पौन्यःपुन्यमेव यङा द्योत्यत इति तार्किकोक्तमपास्तम्। णिजर्थः प्रेरणा। णिङर्थप्रेरणायां वक्तैव प्रेरकः। णिजर्थप्रेरणायां तु तद्भिन्नोऽपीति भेदः।

25. कृदर्थनिरूपणम्

25.1 अथ कृतामर्थो निरूप्यते। भावकृत्सु एधितव्यमित्यादिषु धात्वर्थानुवादकत्वमात्रं पाक इत्यादौ घञादिभिः सिद्धावस्थापन्नः धात्वर्थातिरिक्तो भावोऽभिधीयते। यद्धात्वर्थान्वये स्तोकं पाक इति घञर्थान्वये स्तोकः पाक इति विशेष उपपद्यते।

25.2 एवं क्त्वार्थो भाव एव। "अव्ययकृतो भाव" इति वचनात्। समानकर्तृकत्वं पूर्वकालीनत्वं च क्त्वाद्योत्यम्। पूर्वत्वञ्च सन्निहितक्रियापेक्षया बोध्यम्। तत्पूर्वकालीनत्वं तत्प्रागभावकालवृत्तित्वम्। तदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वं वा। तेन भुक्त्वा व्रजतीत्यत्र गमनप्रागभावावच्छिन्नकालवृत्तिभोजनकर्तृका व्रजनक्रियेति बोधः। मुखं व्यादाय स्वपिति इत्यत्र तु व्यादानोत्तरस्वापपूर्ववृत्तित्वम्। कालस्तु तात्पर्यवशाद् व्यवहिताव्यवहितसाधारणो बोध्यः। तेन पूर्वस्मिन्नब्दे गत्वाऽन्यस्मिन्नब्दे समागत इति प्रयोगसङ्गतिः।

---

393. *गर्हादि* इति उपलब्ध-क-पाठः

25.3 नैयायिकनव्यास्तु समानकर्तृत्वं पूर्वकालत्वं च क्त्वावाच्यमित्याहुः, तन्न, तत्र प्रत्ययार्थविशेष्यत्वेन क्रियाप्राधान्यविरहादाभीक्ष्ण्ये द्वित्वाभावापत्तेः। गुणीभूतक्रियामादाय तत्प्रवृत्तौ तु पाचकादावतिप्रसङ्गः, भावे विधायकानुशासनविरोधाच्च। एवं भोक्तुं व्रजतीत्यादावपि भाव एव तुमुनोऽर्थः।

25.4 यत्तु तार्किकाः इच्छावान् तुमुनोऽर्थः। भोक्तुं व्रजतीत्यस्य भोजनेच्छावान् व्रजतीत्यर्थः। भोक्तुमिच्छतीत्यत्र कर्तरि लक्षणा। भोजनकर्तारमात्मानमिच्छतीत्यर्थः। सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः, सति विशेष्यबोधे इति न्यायाद्, विशेषणकृताविच्छान्वयः इत्याहुस्तन्न, इच्छावति शक्तिग्राहकाभावाद् क्त्वावत्। आभीक्ष्ण्ये द्वित्वानापत्तेः। विशेषणेऽन्यवृत्तिद्वयाश्रयणमिति कल्पनागौरवात्। "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" इत्यनुशासनविरोधश्च। एवञ्चैकाश्रयिका भोजनार्था व्रजनक्रियेति बोधः।

25.5 यत्तु तार्किकाः प्रकृतधात्वर्थशतृशानचोऽर्थः धात्वर्थजन्यफलवान् कर्मशानचोऽर्थ इत्याहुः, तन्न, स्थान्येव वाचको लाघवात्, न त्वादेशो गौरवादिति हि स्वसिद्धान्तभङ्गापत्तेः। किञ्च स्वतन्त्रः कर्त्तेत्यनुशासनसिद्धप्रधानीभूतधात्वर्थव्यापाराश्रयः कर्त्ता। आश्रयत्वं च कर्तृत्वम्। एवञ्चाख्यातस्य कर्तृवाचकत्वे लाघवे सत्यपि कृतिमत्त्वं कर्तृत्वमित्याश्रित्य आख्यातस्य कर्तरि शक्तौ अनन्तकृतिशक्यतावच्छेदकत्वे गौरवमिति दूषणात्[394] परमतं खण्डितम्। तत्त्वसङ्गतम्। तथाहि कर्तृशक्तिवादिमते कृतिमत्त्वं कर्तृत्वमिति न, किन्तु आश्रयत्वम्। एवञ्चानन्तकृतिशक्यतावच्छेदकत्वे गौरवमित्यतिरिक्तं वचः। किञ्च यदि आख्यातस्य कृतिरेव वाच्येति दुराग्रहः। क्वचित् कृतिः। कृतित्व-

394. दुरात् इति उपलब्ध-क-पाठः

मवच्छेदकत्वम्। क्वचिदाश्रयः। आश्रयत्वं लक्ष्यतावच्छेदकम्। पचतीति पाचक इत्यादौ विवरणविव्रियमाणयोः समानार्थत्वभङ्गश्च। एकस्य कर्तृपदस्यार्थद्वयकल्पनाऽर्द्धजरतीयञ्चेति कल्पनागौरवे सति कथं लाघवमिति सुधीभिर्विभावनीयम्। अथ यदि एवं गौरवे सत्यपि स्ववासना-वशादाख्यातस्य कृतिवाचकत्वं लाघवमिति दुराग्रहः। तर्हि तुल्ययुक्त्या विनिगमकाभावे कृदादीनामपि कृतिवाचकत्वापत्तिः। न च नामार्थयोर-भेदान्वयव्युत्पत्तिः कृदादौ कर्तृवाच्यत्वे विनिगमकेति वाच्यम्, माकिमहरहः सन्ध्यामुपासीतेतिवत् स्वतःप्रमाणत्वमुत लाघवमूलत्वेन? नाद्यः, वेदवाक्यातिरिक्तवाक्यस्य स्वतः प्रामाण्याभावात्। नान्त्यः, गौरवात्। किञ्चात्र नामार्थयोरभेदान्वयः उत नामार्थयोरभेद एवेति ? नाद्यः, स्तोकं पचतीत्यादौ अभेदबोधानापत्तेः। नान्त्यः, घटपटावित्यादौ साहित्य-रूपसम्बधानापत्तेः। घटपटयोः सम्बन्धाभावे समासानापत्तेः। तस्मात् सम्भवति समानाधिकरण्ये वैयधिकरण्यमन्याय्यमिति एतन्मूलकन्यायः। एवञ्च पदशक्तिकल्पनायां गौरवात्। तत्त्वमसि, अहं ब्रह्मास्मीत्यादिवाक्ये एव बोधकत्वशक्तिकल्पने लाघवाद्वान्ते च एवं शक्तिज्ञानान्निःश्रेयसाधिगम इति सिद्धम्।

इतिश्रीमन्मौनिकुलतिलकायमान-गोवर्द्धनभट्टात्मज-जानकीजानि-रघुनाथभट्टात्मज-श्रीकृष्णभट्ट-विरचित-वैयाकरणपरिभाषारूप-शब्दार्थतर्कामृताख्यो ग्रन्थः समाप्तः।।

शुभं भूयाद् गुरुप्रसादात्।।

□□

राष्ट्रियसंस्कृतसंस्थानम्
गङ्गानाथझापरिसरः
चन्द्रशेखर-आजादोद्यानम्
प्रयागः - 211002

Design : Brahmanand



राष्ट्रियसंस्कृतसंस्थानम्
गङ्गानाथझापरिसरः
चन्द्रशेखर-आजादोद्यानम्
प्रयागः - 211002

Design : Brahmanand